मन्त्रकल्प संग्रह

तथा

गणधरजयघोषस्तोत्रादि

卐

: सम्पादक :

पं० कल्याणविजय गणि

卐

मन्त्रकल्प संग्रह

तथा

गणधरजयघोषस्तोत्रादि

卐

❀ पं० कल्याणविजय गणि ❀

卐

: प्रकाशक :

श्री माण्डवला जैन संघ

पो० मांडवला (राज०)

प्रथमावृत्ति : ११००
वीरसंवत् : २४६६
विक्रम संवत् : २०३०
ईस्वी सन् : १६७४

प्रकाशक :

श्री मांडवला जैन संघ
मांडवला (राज०)

मुद्रक :

अर्चना प्रकाशन
१, कालाबाग, अजमेर (राज०)

प्रस्ताविक दो शब्द

इस पुस्तक की प्रूफरीडिंग हम कर न सके, अतः मुद्रण विषयक भूल रही हो तो सुधार करके पढ़ें।

अनुक्रम



प्रसिद्ध इतिहासवेत्ता पं० श्री कल्याणविजय जी महाराज

श्री मन्त्राधिराज-यन्त्रोद्धारः

प्रथमः पटल

कल्याणांकुरवारिदः शमसुधावर्द्धिः सुधादीधितिः
कारुण्याम्बुजतिग्मरोचिरखिलक्ष्मापीठकल्पद्रुमः ।
मोहध्वान्ततति प्रदीपकलिका संस्तारनिस्तारकृत्
भव्यानां शिवतातिरस्तु भगवान् वामासुतोऽयं जिनः ॥१॥

भ्रूभङ्गमङ्गनदधे नयने नयास्ते
दध्रे न शस्त्रमपि नो परुषं बभाषे ।
कामं जिगाय निरुपायममाययैव-
मेव प्रणम्रकमलः स शिवाय देवः ॥२॥

श्वभ्रप्रदाऽशुचिरिति प्रथितेतिदोषां
योषां हि संयमवधूवशगो हि हित्वा ।
बभ्राम मुक्तिललनांगमनाः सरागो,
नीरागतायुगपि यच्छतु शं स पार्श्वः ॥३॥

अन्तःस्फुरद्रुचिरसंचितसप्ततत्त्व-
कोटीपतिर्जिनपतिः प्रकटध्वजोऽस्तु ।
वामासुतः फणमिषात्फणिनोऽस्यविश्व-
विश्वार्तिसंहृतिहरो व्यवहारिवद्यः ॥४॥

अज्ञोऽपि विज्ञजनविस्मयकारिकाव्यं,
यस्याः प्रसादलवमाप्य जनस्तनोति ।

मोहान्धकारनिकराक्कंकरप्रभावा,
साभारती भवतु जाड्यतमश्छिदे नः ॥५॥

शून्यात्मकोऽहमपरं स्वकसंगतोऽपि,
कुर्वन्नगण्यमिह पूर्वपदोऽधिकां तु।

सङ्ख्यां यदेकपुरतः स्थितिमाप्य लेभे,
वन्दे विनिर्जितगुरून्स्वगुरून्धिया तान् ॥६॥

दुष्कर्म्मकण्टकिकटुद्रुममूलभेद-
नेमिप्रभं सुललितं प्रभयाभिरामम्।

सद्भावदेवविनतं गतकोपमानं,
सानन्दमुज्झितगुरुं स्वगुरुं नमामि ॥७॥

वाचालयत्यनुकलं विकलं जिनेन्द्र-
भक्ति स्ततोऽहमिति संस्तवने प्रसक्तः।

सद्भिः प्रशान्तमतिमद्भिरतो विमृश्यं,
सेर्ष्यं मनो नहि विधेयमिहाञ्जलिस्तत ॥८॥

काव्ये मुधाकृतसुधालहरीसमूहे,
दोषेक्षिणः खलु खलाः सततं भवन्ति।

स्वादून्मृदूनपि तरून् करभा विहायापीच्छन्ति
हा कटुककण्टकिनः करीरान् ॥९॥

काव्याध्वनि प्रवसतामिह सत्कवीनां,
वामस्वरः खर इवार्थकरोऽनुकूलः।

कर्णे जपः प्रकृतितः कलुषाशयोऽपि,
चित्रं तु दक्षिणरवः प्रतिकूलताकृत् ॥१०॥

निर्यातमब्धितलतो हरकण्ठमाप्य
पीयूषदीधितियुतं तु विहाय मन्ये।

सर्प्पालिदुर्ज्जनकुलेषु विषं सुखेन,
तस्थौ मुखांकुटमनस्सु सुवापनन्दि ॥११॥

पक्षद्वयेऽपि मलिनः खलु कौशिकोऽयं,
दोषाकरेऽपि हि कलंकिनि बद्धरागः ।
वित्रासहेतुरपि वामरवोऽपि बाढं,
शास्त्राध्वनि प्रवसतामिह हर्षकार्ये ॥१२॥

साधौ सुधारसमसद्वचनप्रताने–
कानेककूटनिलयस्य खलस्य चिन्ता ।
प्रद्योतने द्युतिमतीव वितन्वतीव
जागर्ति किं जगति कस्तमसोऽवकाशः ॥१३॥

अब्धौ विधौ मखविधौ फण-भृन्निवासे,
मोहात्सुधामिह मुधा विबुधा वदन्ति ।
क्षारे क्षयिण्यघ शिखि प्रहृते विषार्त्ते,
शास्त्येव सत्यपकृताऽखिललोक शोके ॥१४॥

शक्रस्तव स्तवनमस्तगुणौघसख्य–
वाक्पतेरपि समानमतिर्न कर्तुम् ।
मीनाति वीतमतिकः सिकताकणाङ्कः,
कूलकषाविपुलकूलतले सुराणाम् ॥१५॥

निर्दैवतो बत नरोविबलो विदन्तो,
दन्तीव शूकरइवातिवपुर्विदंष्ट्रः ।
चक्रीव द्वैवतवर्जितशत्रुजातः,
सञ्जातचित्तनिचयः पुरुषश्चकास्ति ॥१६॥

केचित्सुरा इह भवे हितमाचरन्ति,
नामुत्र केचिदिह नो परलोक एव ।
वामासुतः पुनरसाविह विघ्नहर्त्ता,
दाता श्रियां परभवे शिवसौख्यहेतुः ॥१७॥

बाल्येऽपि देवपतिसंस्तुतपादपद्म,–
युग्मस्य संस्तवनमस्य ततः करिष्ये ।

मन्त्राधिराजजिनभर्तु रमर्त्यनागे–
किं माद्यतीह न गजाः प्रमदा भवन्ति ॥१८॥

इति प्रस्तावना

दाता जितेन्द्रिय चयोऽथ निरामयश्चा–
ऽमायो दयार्द्र हृदयो विनयावनम्रः।
स्नातः प्रशस्तदिवसे सितधौतवस्त्रः,
शिष्यो गहीतफलपुष्पसमृद्धगन्धः ॥१९॥

संपूज्य पार्श्व जिनबिम्बमुपोष्य कृत्वा,
वाचाम्लमुत्तमतपः पवनेऽब्जचारे।
सज्ज्ञानचन्द्रधवलीकृतविश्वविश्वं,
ब्रह्मव्रतस्थिरतरं गुरुमित्थमाह ॥२०॥ (युग्मम्)

कृत्वा प्रसादमसमं मयि पादलग्ने,
मग्ने जडत्वजलधौ यदि योग्यताऽस्ति।
मन्त्राधिराज वरयन्त्रयुतं तु मन्त्रं,
पात्रे निधेहि भगवन् करुणां विधेहि ॥२१॥

यज्जानुनाभिमुखमस्तकमस्य पञ्च-
तत्त्वाक्षरैस्तु सकलीकरणं विधाय।
अभ्यर्चिते श्रवसि मन्त्रमथ त्रिवारं
पाणौ क्षिपेद्गुरुरमुष्य सुवर्णमम्भः ॥२२॥

क्षेत्रे सुबीजमिव मे भवतां प्रसादात्
मन्त्रः प्रभो सफलतां कलयत्वमोघः।
इत्थं वदन्नमति पादयुगं गुरूणां,
शिष्यो यतो भवति कार्यकरः प्रणामः ॥२३॥

इति प्रस्तावनाप्रदानविधिर्नाम प्रथमः पटलः ॥

❀ ❀

अथ द्वितीयः पटल

मन्त्राधिराजवलयेषु यथास्थितानि,
वक्ष्यामि सप्तसु यथाक्रममक्षराणि।
आद्ये जिनेन्द्रषट्कोणविधिन्तु मंत्र-
वर्णं क्रमेण सहितं तु हिताय वच्मि ॥१॥

आदौ जिनेन्द्रवपुरद्भुतमन्त्रयन्त्रा
ह्वानासनानि१ सकलीकरणञ्च२ मुद्रा३।
पूजां४ जपं५ तदनु होम विधिं६ षडेव
कर्म्माणि संस्तुतिमहं सकलं भणामि ॥२॥

आद्यावनीतलसरोवरहाटकाद्रि-
नालोद्भवाष्टहरिदग्रचदलासनस्थम्।
चन्द्राभचीवरजयाविजयागृहीत-
गङ्गोदकप्रवरचामरवीज्यमानम् ॥३॥

ऐरावतप्रतिमकुम्भिकृताभिषेकं,
छत्रत्रयीत्यथ जगत्रयनायकत्वम्।
पर्यङ्कशायिवपुषं सुखसिन्धुमग्नं,
नासानिवेशपरिपेशलदृष्टियुग्मम् ॥४॥

बालप्रवालकदलीदलनीलकान्ति,
क्षाराब्धिमध्यवसुधातलतुल्यदेहम्।
दुर्लक्ष्ययोगिकलयाऽमलया परीतं,
पञ्चेन्द्रियप्रसररोधकबोधशुद्धम् ॥५॥

स्वीयातिनीलमहसा सह सागराद्रि-
वृक्षस्थलीभिरवनी किल नीलयन्तम्।
पार्श्वस्थपार्श्वकमठासुरसेविताङ्घ्रि-
पुष्टाष्टकर्मपटलद्रुदवानलाभम् ॥६॥

शान्तं शिव सुखकरं परमस्वरूपं
व्यक्तेतरं परमहंसकलंगतारिम्।

व्यक्तं शिवं शिववधूपरिरम्भयुक्तं,
सिद्धं बुधं निरवधिं परमव्ययञ्च ॥७॥

नीरञ्जन निरुपधिं विगतस्पृहञ्च,
निर्बाधमाधिरहितं सहितं कलाभिः।
धातारमीशमगलं विमलं ह्यनन्तं,
पारंगत गतभयं शरणं शरण्यम् ॥८॥

निर्मोहमन्त्यमममं निरुजं विमानं
त्रैलोक्यलोकमहितं विगुणं गुणाढ्यम्।
सूक्ष्मं निराश्रयमनुत्तममुत्तमञ्च,
क्षीणाष्टकर्मपटल परमं पवित्रम् ॥९॥

पार्श्वस्थितोरगपतिं प्रथितप्रभाव-
पद्मावतीपरिगतं वलयैर्वृतं तु।
मायाक्षरत्रिवलयं जिनयक्ष-यक्ष-
योषिद्युतं ग्रहगणैः सुरलोकपालैः ॥१०॥

श्रीअश्वसेनतनयं विनयावनम्र-
देवेन्द्रमौलिमणिरञ्जितपादयुग्मम्।
द्वयंसालकद्विभुजसन्धिगुदान्तकोण-
षट्कोणयन्त्रगतमादरतो नमामि ॥११॥ कुलकम्

पाषाण१ दुर्विष२ शरे३ भरियु४ प्रहार-
मेघाम्बु५वाहकरकाशनि६ सन्निभैस्तु।
वाक्यैर्जघान शमिनं जिनमाप्य तस्माद्,
शान्ति दिदेश कमठः शठतोज्झितोऽयम् ॥१२॥

श्रीस्तम्भनेऽपरमतोऽकृत चावतारं,
वामासुतः परिचितोऽभयदेवसूरेः।
कुष्टं पिनष्टि गलदङ्गमसौ स्म तस्य,
वृत्तिं च कार गुरुरेष यतो नवाङ्ग्या ॥१३॥

श्रीपद्मदेवसुगुरोस्तपसोत्तमस्य,
विस्फूर्त्त योऽद्भुततमाहि यतो बभूवुः ।
यस्याक्षराणि तुरगावनि १७ संमितानि,
काष्टौषधीपति १८ मितानि वदन्ति चान्ये ॥१४॥

यस्मात्स्फुरन्ति भविनां भुवि सिद्धयो-ऽष्टौ,
कष्टं विनश्यति समस्तमपीह यस्मात् ।
तन्मन्त्रवर्णनिचयं स्थिति-वर्ण-कर्म-
भेदैर्भणाम्यहमिहात्महिताय बालः ॥१५॥

भाले नीलं दक्षिणेंऽशे च रक्तं,
वामस्कन्धे पञ्चवर्णन्तु हस्ते ।
सिन्दूराभं वामकुक्षौ तु धूम्रं,
मेघश्यामं वामकट्यामरिघ्नम् ॥१६॥

भूयो वामे जानुनीहापि धूम्रं,
वामे पादे पीतवर्णं वदन्ति ।
नाभौ विद्धि स्वामिनः पञ्चवर्णं,
धूम्रं वर्णं लिङ्गसङ्गे भणन्ति ॥१७॥

याम्ये पादे जानु-कट्योः सुवर्ण-
वर्णान् कुक्षौ दक्षिणे कृष्णवर्णम् ।
याम्ये हस्ते नीलवर्णं तमाहु-
श्चेतौ प्राहुः सूरयोऽमू हृदिस्थौ ॥१८॥

मुक्तावस्थं मस्तके श्वेतमेव,
वर्णानेवं प्राहुरष्टादशा ऽपि ।
यन्त्रस्या।न्तः षडबहिः षड्षडेव
कोणोर्द्ध्वं स्यात्क्रमः सर्वदेव ॥१६॥

भाले नीलं दक्षिणेंऽशे च रक्तं,
नाभौ वर्णं पञ्चवर्णं वदन्ति ।

विज्ञा वक्षस्यक्षरे श्वेतवर्णो,
शेषान् वर्णान् योगिनः केचिदाहुः ॥२०॥

अथ मन्त्राधिराजस्य, कमठस्थोपदेशतः।
प्रकटस्य तु बीजानां, निष्पत्यतिशयौ ब्रुवे ॥२१॥

निष्पन्नः प्रथमो वर्णस्त्वर्हतामशरीरिणाम्।
आचार्याणामुपाध्याय-मुनीनां प्रथमाक्षरैः ॥२२॥

मोक्षसौख्यप्रदो भाले, पार्श्वनाथस्य नीलरुक्।
सकलोनाद-बिन्दुभ्यामुपेतस्तेजसां चयः ॥२३॥

स एव दक्षिणे स्कंधे, रक्तवर्णस्तु चिंतितः।
जगद्वश्यमवश्यं हि, प्रदत्ते योगिनां पुनः ॥२४॥

शून्यवह्न्यक्षरभवः प्रभवः, सर्वसम्पदाम्।
नादबिन्दु-कलोपेतः साकारः पञ्चवर्णयुक् ॥२५॥

वामातनुजवामांस-संस्थितो रूपकीर्तिदः।
धनपुण्यप्रयत्नानि, जय-ज्ञाने ददात्यसौ ॥२६॥

स एवेश्वरसंयुक्तः स्थितो हस्ते जिनेशितु।
योगिभिर्ध्यायमानस्तु, रक्ताभोऽतिशयप्रदः ॥२७॥

षष्ठस्वरजितोऽरिघ्नो, धूमवर्णः स एव हि।
पूज्यतां विजयं रक्षां दत्ते ध्यातोऽस्य कुक्षिणः ॥२८॥

विसर्गद्वयसंयुक्तः स एव श्यामलद्युतिः।
जिनवामकटीसंस्थः, प्रत्यूहव्यूहनाशनः ॥२९॥

सर्वाऽशिवप्रशमनो ऽञ्जनकान्तिर्विसर्गयुक्।
वामजानुस्थितो ध्यातः, षड्विंशतितमोऽक्षरः ॥३०॥

वामेयवामचरणे, पीतवर्णः कखात्मकः।
पिशाचग्रहभूतानां, शाकिनीनां प्रमर्दनः ॥३१॥

सुवर्णाभहरं नीलवर्णकारसमन्वितम्।
रक्तप्रभकलं श्याम-बिंदुकुन्दभ नादयुक् ॥३२॥

नाभिपद्मस्थितं ध्यायेत् पञ्चवर्णं जिनेशितुः ।
तस्थुर्हरे षोडशामी सुवर्णद्युतयो जिनाः ॥३३॥

ईकारे संस्थितौ पार्श्व-मल्ली नीलौ जिनेश्वरौ ।
पद्मप्रभ-वासुपूज्यावरुणाभौ कलास्थितौ ॥३४॥

सुव्रतो नेमिनाथस्तु, कृष्णाभौ बिन्दुसंस्थितौ ।
चन्द्रप्रभ-पुष्पदन्तौ, नादस्थौ कुन्दसोदरौ ॥३५॥

हितं जयावहं भद्रं, कल्याणं मङ्गलं शिवं ।
तुष्टि-पुष्टि-करं सिद्धि-प्रदं निर्वृतिकारणम् ॥३६॥

निर्वाणाभयदं स्वस्ति-शुभधृतिरतिप्रदम् ।
मति-बुद्धिप्रदं लक्ष्मी-, वर्द्धनं संपदां पदम् ॥३७॥

त्रैलोक्याक्षरमेनं ये, संस्मरन्तीह योगिनः ।
नश्यत्यवश्यमेतेषा-मिहाऽमुत्रभवं भयम् ॥३८॥

द्वाविंशतितमो वर्णः, पञ्चमस्वरसंयुतः ।
धूमवर्णो जिनेन्द्रस्य, लिङ्गस्थाने व्यवस्थितः ॥३९॥

वामेयदक्षिणे पादे, रुद्रसंख्याक्षरोऽस्वरः ।
हेमवर्णो जानुकट्या-द्वाविमावेव संगतौ ॥४०॥

षान्तं लान्तसमायुक्तं, साकारं श्यामलद्युतिम् ।
वामेयदक्षिणे कुक्षौ, मरुद्वर्णं विचिन्तयेत् ॥४१॥

साकारं नीलवर्णं त्र्यधिकत्रिंशदक्षरम् ।
विचिन्तयेज्जिनेन्द्रस्य, संस्थितं दक्षिणे करे ॥४२॥

चित्समानमिदं वर्ण-षट्कं च संस्मृतं सदा ।
योगिभिर्ध्याननिपुणैर्जिनभक्तिपरायणैः ॥४३॥

तोयानिलविषादीनां ग्रहराजाजि रक्षसाम् ।
अरातिमारि दस्यूनां, श्वापदानां भयं हरेत् ॥४४॥

श्रीपार्श्वनाथवक्षोज-युग्मे कुन्दसमद्युती ।
रुद्रार्यमस्वरौ चिन्त्यौ, त्वाद्यस्याधिपतिर्जया ॥४५॥

शिवा शान्तिकरीतुष्टि-पुष्टिस्वस्तिकरी हि सा।
विजयान्यस्य वर्णस्य ते चामरकरे उभे ॥४६॥

त्रैलोक्यमक्षरं मूर्ध्नि, कोणरेको परिस्थितम्।
हिमेन्दुकुन्दसङ्काशं पार्श्वनाथस्य चिन्तयेत् ॥४७॥

जातरूपसमाकारा यन्त्ररेखाश्च कारयेत्।
मन्त्रयन्त्रात्मकं पार्श्व-मित्थं योगी विचिन्तयेत् ॥४८॥

ह्लाँ३ वामकांशशिखरस्तनुमध्यगो-ह्लीं४
ह्लूँ मंगदो५ ह्ल ६इति कूर्प्परमध्यदेशे।
य ७कूर्प्पराग्रवसतिस्तु कलाचिकाक्षो८
नाभेरधोविहितफुः१० स्फुटपार्श्वनाथः ॥४९॥

दों दक्षिणा११ नघविशाल कलाचिकान्तः
फुः१२ कूर्प्परान्तर्गतोऽश्च तदग्रगः टुः१३।
स्वा१४ बाहुरक्षकमयःशुभ हां१५ सकाग्रच-
स्तन्मध्यॐ२मितिकृतः प्रकृतिः श्रियेऽस्तु ॥५०॥

नादाग्रबिन्दुतव चन्द्रकलाशिरस्थं,
ब्रह्म स्वरूपममलं जिनपार्श्वनाथ।
रम्भादलाभवपुष हि निजे ललाटे
ध्यायन्ति ते त्रिजगतीं प्रविलोकयन्ति ॥५१॥

चन्द्राभनादशितिबिंदुकलारुणत्व-
भास्वत्सुवर्ण लहरं शिर ई विनोलम्।
ये बीजमेतदनघं सुधियः स्वनाभौ,
ध्यायन्ति ते त्रिजगतीं प्रविलोकयन्ति ॥५२॥

शीतांशुनिर्म्मलजया-विजया स्वरूप
रुद्रा११ यम१२ स्वरयुगप्रथितप्रभावम्।
ये दक्षिणेतरकुचस्थितमध्यभागे,
ध्यायन्ति ते त्रिजगतीं प्रविलोकयन्ति। ५३॥

षट्कोणयन्त्रकलया तव पार्श्व रूपं,
भास्वत्किरीटमणिरश्मिविवृद्धशोभम्।

ध्यायन्ति ये निजशरीरकृतावतारं
ते नाथ शाश्वतपदश्रयिणो भवन्ति ॥५४॥

देवोऽष्टादशदोषवर्ज्जितपुरोऽष्टप्रातिहार्यान्वितो,
नासावंशनिवेशतारनयनः सर्व्वप्रभावैर्युतः ।
स्फूर्ज्जत्कर्मकरीन्द्रविद्रवहरिः कर्म्माष्टकस्फूर्त्तिमान्,
वामेयः कमठासुरेण विनतः पायादपायादसौ ॥५५॥

इति मध्यवलये जिनमन्त्रव्यावर्णनो नाम द्वितीयः पटलः ॥

अथ तृतीयः पटलः

मन्त्राधिराज वलये विमले द्वितीये,
षटचन्द्रकोष्टकयुते परितः स्थिताश्च ।
विद्यासुरी रसविधु१६ प्रमिता हिताय,
वर्णास्त्रवाहनभुजैरथ संस्तवो म ॥१॥

गोवाहना कुन्दसमानवर्ण्णा, चापाक्षमालाशरशङ्खयुक्ता ।
चतुर्भुजा भूषणभूषिताङ्गी सा रोहिणी नो दुरितानि हन्तु ॥२॥

त्रिशूलदण्डा-भयबीजपूर,-हस्ता प्रशस्ता वरलोहिताङ्गा ।
या देवता पज्ञप्रतीति नाम्नी, सर्प्पासनस्था दुरितानि हन्तु ॥३॥

श्वेतद्युतिर्यावरदामपद्म,-सत्शृंखलारुद्धभुजा महाभा ।
या वज्रपूर्वा भुवि शृंखलाख्या पद्मासनस्था दुरितानि हन्तु ॥४॥

जांबूनदाभा गजगामिनो हि, फलाक्षमालांकुशशूलपाणिः ।
अनेकदेवाभिनतानताङ्गी वज्राङ्कुशी नो दुरितानि हन्तु ॥५॥

....

.... ॥६॥

रक्ताक्षबद्धासन संस्थितिर्या, हेमप्रभा खेटकखड्गहस्ता ।
स बीजपूराऽभयदानशस्ता, नदत्तनाम्नी दुरितानि हन्तु ॥७॥

घनाघनाभा कमलासनस्थाः त्रिशूलमाज्ञाशिवमुग्दराङ्का।
काली कला भासुरसच्छरीरा, सा देवता नो दुरितानि हन्तु ।।८।।

कलापिकण्ठावलिनीलदेहा, सरोजमाला वरघंटिकाङ्का।
नृपृष्ठसंस्था तु महेतिपूर्वा,-सा कालिका नो दुरितानि हन्तु ।।६।।

उत्तप्त जांबूनदमूर्तिकान्तिः कुकुम्रवाहाभिरतानताङ्गी।
अब्जाक्षमाला वरदंडहस्ता, गौरी हि देवी दुरितानि हन्तु ।।१०।।

धाराधराकार सरीर घृष्टिः सहस्र पत्रासनसंस्थिता या।
त्रिशूलदण्डाऽभयदानहस्ता गन्धारीदेवी दुरितानि हन्तु ।।११।

श्वेतच्छदस्थासितरोचिवर्णा चतुर्भुजन्यस्त सरिसृपाङ्का।
चतुर्भुजा या च महेतिपूर्वा ज्वालाभिधाना दुरितानि हन्तु ।।१२।।

या भिन्नवर्णा कमलासनस्था वृक्षाक्षमाला वरदानपाणिः।
सा मानवी मानव नम्यपाद पद्मद्वयानो दुरितानि हन्तु ।।१३।।

विहंगराजासनबद्धसंस्था पयोधराभाभुजगेन्द्र पन्नो।
फणीन्द्रयुग्मासिमु खेटकांका वैरोटयदेवी दुरितानि हन्तु ।।१४।।

तरङ्गवाहास्थितनित्यकाया खड्गासिपत्रीशरखेटकाङ्का।
या जातरूप प्रतिजातरूपा त्वच्छुप्तदेवी दुरितानि हन्तु ।।१५।।

हिमांशुरोचिः प्रतिमानिनान्तं श्वेतच्छदस्था धृतशूलमाला।
वरप्रसन्नाननपूर्णचन्द्रा सा मानुषी नो दुरितानि हन्तु ।।१६।।

सारङ्ग संस्था हिमरोचिदेहा भृङ्गारखड्गाभय खेटकाङ्का
श्रीमानुषी यापि महेतिपूर्वा सा देवता नो दुरितानि हन्तु ।।१७।।

द्विरष्ट विद्या वरदेवतानां स्पष्टाक्षरं स्तोत्रमिदं पठेद्यः।
स प्रीतियोगं लभते मनुष्यः श्रीपार्श्वतः सागरचन्द्ररूपम् ।।१८।।

वामासुतक्रम कुशेशय भृङ्गभावं
ये बिभ्रतीह भविका मुदिताशयास्तु।
तेषां गृहेषु दुरितं प्रकरं हरन्त्य स्तन्वन्ति
शान्तिकममुस्त्रिदशाङ्ग नाहि ।।१६।।

(इति विद्यादेव्यः)

ततस्तृतीयवलये ह्यमुष्यस्थिताश्चतुर्विंशति कोष्टकेषु
स्तवीमिसर्व्वज्ञतते: सवित्रीर्जगत्त्रयी वंदितपादपद्मा: ॥२०॥

श्री मरुदेवी१विजया२,सेनादेवी३ततश्च सिद्धार्था४।

स्यान्मङ्गला५ सुसीमा६ पृथिव्य७ थो लक्ष्मणा देवी८ ॥ ॥

रामा९ नंदा१०विष्णू११ जया१२
ततः श्यामिका१३ च सुयशा१४ च।
स्यात् सुव्रता१५ चिराच१६ श्री१७
रथदेवी१८ प्रभावती१९ पद्मा२० ॥२१॥

वप्रा२१ शिवा२२ च वामा२३
त्रिशला२४ देवीति जिननी:।
निज निज पुत्र समेताः एताः
सन्ततमहं नौमि ॥२२॥

(इति जिनजनन्य:)

तुर्ये जिनेन्द्र वलये जलधिद्धि २४ कोष्टे
यक्षान् जिनेन्द्र पदपङ्कज चञ्चरीकान्
वर्णासनानन भुजायुध कीर्त्तनेन,
स्तोष्यामि कामित ददानहमादरेण ॥२३॥

हेमच्छविर्द्धिपगतिर्वर जापमाला
संयुक्त दक्षिणकरो रिषभस्य भक्त:।
सन्मातुलिङ्ग कलपाशगवामयाणि
दद्यात्सुखानि मम गोमुख यक्षराज ॥२४॥

श्यामो गजेन्द्रगमनो वरतुर्य वक्त्रो
याम्येक्ष दामवरमुद्गरपाशपाणि:।
सन्मातुलिङ्ग सृणि शक्त्य भयांकवाम-
पाणिर्महोपपद यक्षवर: शदोऽस्तु ॥२५॥

धराधरच्छविरवत्वभयाहि शत्रु
रङ्ग-द्गदा युगपसव्य भुजस्त्रिनेत्र:।

....

सर्पासनस्थितिरयं त्रिमुखो मदीयम् ॥२६॥

श्यामो गजेन्द्रगतिरीश्वर नामधेयः
सन्मातुलिङ्ग जपमालिकया.........हस्तः।
ब.........ङ्कुशप्रवर वामकरः पुनातु,
तुर्योऽभिनंदन जिनक्रम पद्म भृङ्गः ॥२७॥

शीतद्युति छवि तनुर्वर शक्ति
हस्तो गदोरगपपाशग वामपाणिः।
यो वैनतेय गमनो दुरितापहारी,
यक्षः स तुंबर इह प्रथितप्रभावः ॥२८॥

रभादलाभवपुरेण कुमारयानो यक्षः
फलाभयपुरो सुभुजः पुनातु।
बभ्र्वक्षदामयुत वामकरस्तुगात्रं
पद्मप्रभक्रमगतः कुसुमाभिधानः ॥ २९ ॥

पूर्वांकुरा कृतिरि भासन बद्धसस्थो
ब्रह्मद्रु बिल्वयुतदक्षिणपाणियुग्मः।
मातंङ्ग एष न कुलांकुश वामहस्तो
विघ्नव्रजं हरतु मे सततं त्विह स्थः ॥ ३० ॥

हंसासनस्त्रिनयनो विजयो विनीलो
दद्याज्जयं हि मम मुद्गर चक्रपाणिः।
श्वेतोजितः कमठ गोभय मातुलिङ्ग
पाणिस्तनूं न कुलकुम्तकरः पुनातु ॥ ३१ ॥

पीयूष दीधितिसितः कमलासनस्थो
ब्रह्माभिधस्त्रिनयनोऽथ चतुर्भुजश्च।
सन्मातुलिंगवरमुद्गरपाशपाणि-
र्जाप्यस्त्रगं कुशगदान कुलाङ्कहस्तः ॥ ३२ ॥

पीयूषपादधवलो वृषयानयानो
यक्षो ददातु सुखमीश्वर नामधेयः।

पाणिद्वयी धृतगदाकलमातुलिङ्गो
बभ्र्वक्षदामयुगवामकरस्त्रिनेत्रः ॥ ३३ ॥

कुन्दद्युतिर्वरमरालगतिः कुमार
यक्षोऽथदक्षिणभुजेषु फल प्रशस्यः ।
बिभ्रद्धनुः सनकुलत्विह वामपाणि
युग्मे ददातु सुखमेष चतुर्भुजश्च ॥ ३४ ॥

चक्राक्षदामफलशक्तिभुजङ्ग पाशा-
खङ्गाङ्कदक्षिणभुजः सितरुक् सुकेकी ।
चक्रांकुशाभयधनुः फल कोर गारि
पाणिः श्रियं ददतु षण्मुख यक्ष एष ॥ ३५ ॥

पद्मासनस्त्वरुणरुक् त्रिमुखस्त्रिनेत्रः
षट्पाणिरम्बुजकृपाणसुपाशपाणिः ।
पातालनाम कलितः फलकाक्षमाला
बभ्र्वक्षवामभुजयुग्दुरितानि हन्तु ॥ ३६ ॥

कूर्मस्थितिस्त्रिवदनारुणरुक् शरीरः
सद्बीजपूरमभयं च गदां दधानः ।
याम्यैः करैर्नकुलपकज जापमाला
वामैः करैर्हरतु किन्नर एष दुःखम् ॥ ३७ ॥

धाराधरद्युतिकलः किडिवाहनस्तु
सन्मातलिङ्ग जलजेतु जयोर्दधानः ।
बभ्र्वक्षदामयुत वामकरो वराह
यक्षस्त्वखण्डित सुखानि ददातु चैषः ॥ ३८ ॥

पानीयपूर भृत नीरद तुल्य देहः
प्रत्यूह संचयमभिद्यतुहंसयानः ।
गंधर्व्व एष वरपाशभृदग्रचपाणिः
सन्मातुलिङ्ग सृणिवामकरो मदीयम् ॥ ३९ ॥

यक्षोऽसितो वृषगतिः शरमातुलिङ्ग
पाशाभया सिक्रममुद्गर पाणिषट्कः ।

शूलांकुशसग हि वैरि धनूंषि
बिभ्रद्वामेषुखेटक युतानि हितानि दद्यात् ॥ ४० ॥

इन्द्रास्त्रकान्तिरिभराजगतिः कुमारः
शूलाभये वर कुठार युते दधानः ।
याम्येषु मुद्गर जपस्त्रजमग्रच शक्ति
सद्बीजपूरमपरेषु करेषु शाय ॥४१॥

कर्पूरपूरधवलोष्टभुजो वृषस्थः
स्त्र्यक्षोजटीफलगदाशर शक्तिपाणिः ।
चापं कुठार मुदजं न कुलं दधानो
वामेष्वथाद्य वरुणा हरणोद्यतः स्यात् ॥४२॥

स्वर्णद्युतिर्वृषगतिश्चतुराननश्च
त्र्यक्षोऽष्टपाणिरधहृद्भृकुटिर्भवेन्नः ।
याम्येफलाभयसुमुद्गर शक्ति हस्तो
वज्राक्ष सूत्र पर शूरग वैरिपाणिः ॥४३॥

षट्पाणिरम्बुदनिभो नृगतिस्त्रिनेत्रो
गोमेध एष सुखमाप्तजनस्य दद्यात् ।
सद्वीजपूरपरशावथ चक्रमग्रच
हस्तेषु शक्तिनकुलौदधदग्रच शूलं ॥४४॥

श्यामो गजेन्द्रवदनोऽहि फणाढ्य मूर्द्धा
स्यात्कूर्मगः सुखकरः किल पार्श्वयक्षः ।
सन्मातुलिङ्ग भुजगावपसव्यगौ च
बभ्रूरगावितरतः सततं दधानः ॥४५॥

श्रीवर्द्धमान जिनपाद मराल लीलः
श्यामोगजेन्द्रगमनो द्विभुजः पुनातु ।
मातङ्ग यक्ष इह मङ्गलसिद्धिकारी
सद्बीजपूर नकुलौ भविनं दधानः ॥४६॥

वामासुत क्रम कुशेशयमात्मचित्ते
धत्ते हि यो नवरतं नवरङ्गभक्तिः ।

यक्षावलो किल विलीनविपक्षलक्ष-
स्यामुष्यशान्तिमियमोकसि सन्तनोति ॥४७॥ (इतियक्षा)

यानानना युध कराङ्क रुचिप्रभेदैः
संकीर्त्तयाम्यहमतः स्थितिमादधानः।
यक्षाङ्गनाश्च वलये जिन २४ संख्यकोष्ठे
यन्त्रस्य चास्य किल पञ्चमके सुकेश्यः ॥४८॥

तार्क्ष्यस्थितिः कनककान्ततमास्त्रपाश
चक्रेषुपुञ्जवर दक्षिणपाणिरेषा।
चक्राङ्कुशा शनिधनुर्युतवामहस्ता
चक्रेश्वरी सुखकरी भविनां सदास्यात् ।४९॥

क्षोरार्ण वोर्मि चय निर्मलदेह कान्ति
लोहासना हि वरपाशयुताग्रचपाणिः।
सद्बीजपूर सृणि सङ्गत वामहस्ता
भूयादियं हि विजया विजयाय पुंसाम् ॥५०॥

देवीतुषार गिरि सोदर देह कान्ति-
दद्यान्मुदं शिखिगतिः सततं परीतान्।
जापस्त्रज वरमियं तु फलाभये च
सं बिभ्रती भुजचतुष्टय शोभमाना।५१।

संसारिका४ मधुकरो.................
........स वर पाश गयाम्य पाणिः।
नागांकुशावितरपाणि युगे वहन्ती
सौख्यान्यसावसुभृतां विनता५ ददातु ॥५२॥

संमोहिनी कनकरुग् वरपाशहस्ता
दद्यान्मुदं फलसृणी दधती कजस्था।
श्यामानृयान.... ....
कुराप्यथ मानसी च ॥५३॥

ज्वाला करालवदना द्विरदेन्द्रयाना
दद्यात्सुख वरमथो जपमालिका च।

पाशं सृणि मम च पाणिचतुष्टयेन
ज्वालान्विता च दधति किल मालिनी च ॥५४॥

पीता वराह गमना स्वसि···· ···· ···· ····
···· ···· ···· ···· ···· भद्भृकुटी सुखाय।
चाण्डालिका १० हिमसमावर जापमाला
युग्गो गतिश्च कलशांकुल (श) वामहस्ता ॥५५॥

गोमेधिका ११ सवर पात्र कराम्बुजस्था
नीलाफलांकुशकरा च हितानि दद्यात्।
सिंहस्थितिर्हिमस···· ···· ···· ···· ···· ····
विद्युच्छिदा भवतु कुम्भसृणी दधाना ॥५६॥

कृष्णाजिता१३ तुरगगावर शक्तिहस्ता
भूयाद्धिताय समदामगदे दधाना।
प्रीतप्रभाकमलगाशरपाशहस्ता
चापाहि पांकितकरा च विजृम्भिणी च ॥५७॥

पद्मासनापरभृता१४ हिमरुक् सुपाश
खड्गान्विता सुखकरा सृणि खेटकांका।
कंदर्पिकाथ ऋषगोत्पलमंकुश च
पद्मद्वयं हिम समा शिवदा वहन्तो ॥५८॥

कुन्दद्युतिः कमलगोत्पलपुस्तकांका स्या-
द्धारिणी१६ वरकमण्डलयुक् सुखाय।
गान्धारिणी१७ शिखिगतिः किल बीजपूर
शूलान्वितोत्पलमुसं ढि करेन्दु गौरा ॥५९॥

नीलोत्पल फलमथाम्बुजमक्षसूत्र
काली १८ तमालदलरुक्कजगा वहन्तो।
कृष्णा मुदे जल जगावर जापमाला-
युग् शक्तियुग् फलकरा नव जात देवी ॥६०॥

भद्रासनाहिमसमावर जापमाला पाणिः
सुगंधिरिह शूल फलाभ्युपेता।

श्वेता मरालगमना सुममालिनीशं
दद्यादसिं वरफलं फलकं वहन्ती ॥६१॥

कूष्माण्डिनी २२ कनककान्तिरिभारियाना
पाशाम्र लंुबि सृणि सत्फलमावहन्ती ।
मुद्रद्वयं करकटीतटगं च नेमि-
नाथक्रमाम्बुज युगं शिवदा नमन्ती । ६२॥

पद्मावती२३ भुजंगराजवधूर्विधूत
विघ्ना सुवर्णतनु कुक्कुट सर्प्पयाना ।
पाशाम्बुजा चितकरा त्रिफणाढ्यमौलिः
पायात्फलांकुश विराजितवामपाणिः ॥६३॥

सिद्धार्थिका नवतमालदलालिनील-
रुक् पुस्तिका भयकरा नखरायुधांका ।
वोणाफलांकित भुज द्वितीया हि भव्या
नव्याज्जिनेन्द्र पदपंकजबद्धभक्तिः ॥६४॥

श्रीअश्वसेन तनयं विनयावनम्रा ध्यायन्ति
ये स्वहृदये त्रिकृत न्यकृत्या ।
यक्षांगना जिनपती निबतान्नताङ्गचः
आराधयन्ति सततं दुरितं हरन्त्यः ॥६५॥ इति यक्षिण्यः,

एतस्य लाञ्छनतनु छवि देह
नामानुवाद जननी जनकाभिधानैः ।
स्तोष्ये जिनानूहमिमान् वलये स्थिताश्च
षष्ठेऽधुनेह परतो हितहेतवेऽपि ॥६६॥

श्रीनाभिभूपमरुदेवि सुतो वृषांको
गांगेय गौर शतपञ्चधनुः प्रमाणः ।
संसारसागर विसारतरी विनीता
स्वामी शिवं दिशतु मे स युगादिनाथः ॥६७॥

अष्टापदद्युतिधरो द्विरदेन्द्रचिह्नः
पचाशती शतचतुष्टय चापतुङ्गः ।

दद्यान्मतानि विजयाजित शत्रुपुत्रोऽ
योध्याजनिर्जिनपतिस्त्वजितो द्वितीयः । ६८॥

गाङ्गेय भः शतचतुष्टय चापदेहः
श्रावस्ति पूः कृतजनिस्तुरगाङ्किताङ्ग ।
श्येना जितारितनयो विनयान्नतोय
श्री शंभव प्रभवता शिवतातये नः ॥६९॥

सिद्धार्थं संवर सुतः कपिपोत चिह्नो,
ऽयोध्याजनिर्मथितमन्मथसंकथस्तु ।
हेमद्युतिः खशरवह्नि ३५० धनुः शरीरे
मानोऽभिनंदनजिनो भविनः पुनातु ॥७०॥

हेमद्युतिस्त्रयधनुः शतदेहमानोऽ
योध्याजनिर्नृपतिमेघरथाङ्कजन्मा ।
क्रौंचाकितः सुरनतः किलमङ्गलाय
भूयादयंसुमतिदः सुमतिर्जिनेशः ॥७१॥

पञ्चाशताद्विशततापतनुः सुसीमा
श्रीमद्वराभिधनृपप्रभवो विभूतिम् ।
कोशाम्बि भूः कृतजनिर्जलजाङ्गलक्ष्मा
पद्मप्रभोऽरुण तनुर्वितनोतु देवः ॥७२॥

वाराणसीकृतजनिः फणपञ्चकांको
हेमद्युतिः शतधनुर्द्वितीय प्रमाणः ।
श्रीमत्प्रतिष्ठ पृथिवी तनयो विभर्ति
सत्स्वस्तिको जिनपतिर्ददतां सुपार्श्वः ।।७३।।

व्योमेषु शीत रुचि संख्य धनुः प्रमाणः
श्रीलक्ष्मणा जठर भूर्महसे न सूनुः ।
चन्द्राङ्क चन्द्र रुचिचन्द्रपुरी सुजन्मा
चन्द्रप्रभः प्रभवता भवती भिदेनः ।।७४।।

काकंदकीकृतजनिः शतचाप तुङ्गो
रामाङ्ग भूर्धवलरुग्मकराङ्गचिह्नः ।

देवेन्द्र वन्द्य चरणः सुविधिर्विभूतिं
सग्रीव भू वितरतां मम पुष्पदन्तः ॥७५॥

श्रीवत्सयुग् नवति चाप तनुप्रमाणो
नन्दा सुतो दृढरथान्वय मण्डितोऽयम् ।
उत्तप्त हेमरुचि भद्दिलपूः सुजन्मा
श्रीशीतलोऽवतु जनं कलशील लीलः ॥७६॥

श्रेयांस एष कलधौत समोह्य शीतिः
चापोच्चदेह इह गण्डकलाञ्छनस्तु ।
श्रीविष्णुभूमिपतिविष्णुवधूतनुजः
श्रेयांसि यच्छतु सुसिंह पुराधिजन्मा ॥७७॥

रक्तप्रभो महिषलाञ्छन लाञ्छितांङ्ग
श्चंपाजनिस्त्वथ जया वसुपूज्य पुत्रः ।
यश्चापसप्तति तनु प्रमितिर्मतानि
श्रीवासुपूज्य जिन एष स तां ददातु ॥७८॥

श्यामा भवो ह्यवनिभुक्कृत वर्मपुत्रः
काम्पिल्यपत्तनजनिः कनकावदातः ।
कोदण्ड षष्टि तनुर्यष्टिरसौ वराह
लक्ष्मा ददातु विमलः कमलां जिनेशः ॥७९॥

श्येनाङ्कसिंह रथ भू कनक श्चयोध्या
जन्माविनीत सुरसस्तुत पादपद्मः ।
व्योमेषु कार्मुकतनुः सुयशा तनूजो
दद्यादनन्त सुखमेष जिनस्त्वनन्तः ॥८०॥

वज्राङ्क रत्नपुरसंभव हेमकान्तिः
श्रीभानुभूप कुलदीपक सुव्रता भूः ।
पञ्चाब्धि ४५ कार्म्मुक तनोर्जितमन्मथैषा
श्री धर्म्मनाथ जयनाथ कृता धिमाथ ॥८१॥

सज्जातरूप वर रूप धरो मृगाङ्कः
श्री विश्वसेन नृप भूरचिरा तनूजः ।

व्योमाब्धि ४० चाप तनुहस्तिपुरा भ जन्मा
देवा व्यपोहतु हृतं मम कुंथुनाथः ।।८२।।

त्रिशद्धनुस्तनु बिभ्रत्कनकाभ नंदा-
वर्त्ताङ्क नागपुर संभव देववद्यः ।
देवीहृदं बुजरवेऽवसु दर्शनाङ्ग
जातार नाथ घन माथ भवारि मारेः ।।८३।।

श्रीं मल्लिनाथ कदलीदलनीलदेहः
पञ्चद्वि २५ कार्म्मुकतनो नृप कुम्भ पुत्रः ।
श्रीमत्प्रभावती जने मिथिलापुरी ज
कुंभांकभां वितर नेतर मर्त्य-जुष्टः ।।८४।।

तैलाक्त कज्जलकलेवर कूर्म्मचिह्न
विंशद्धनुः २० स्तनु विमान सुमित्र सूनोः ।
प्रभावती प्रभवराजगृहात्तजन्मा
जन्माघ संघमभिपातय सुव्रतार्हन् ।।८५।

हेमद्युति कलविनील महोत्पलाङ्कः
पञ्चेन्दु कामुंक तनु१५मिथिलापुरिस्थः ।
विप्राभवोविजयभूपति लब्धजन्मा
स्याच्छांतये नमिजिनो भविनां तु नाम ।।८६।।

श्रीमत्समुद्रविजयात्मज शंखचिह्नः
कृष्णांग चापदशकोच्चतनुर्मनो मे ।
श्रीमतशिवा भव भवाध भवाधिहीनं
श्रीनेमिनाथ कुरु शौर्य पुरावत सः ।।८७।।

बाराणसी पुरिजने कदलीदलाभ
सर्प्पाङ्कहस्त नवकोच्च शरीरधीरः ।
श्री अश्वसेन कुलपङ्कज राजहंसः
वामातनूज जयमोक्षदपार्श्वनाथः ।।८८।।

सिद्धार्थ पार्थिव भवस्त्रिशला तनूजः
हेमद्युते हि भुजसप्त तनुप्रमाणः ।

कंठोरव प्रकट लाञ्छन वाञ्छितार्थं
श्री वर्द्धमान मम देहि विमानमायः ॥८६।
यश्चित्तोमुदितेऽदसीय सुपद द्वं द्वं विधत्ते शिवम्।
शश्वच्चासनयानयाद्रं हृदयोऽमायः सुकायः पुमान् ॥
एते वीतमदाः सदा दिविषदां वृंदेन सं वंदिता।
सानदं शिवसम्पदं दमदयार्वतोऽस्य दद्युर्जिनाः ॥६०॥
(इतिजिनाः)

त्रैलोक्यख्यातिवर्णस्तपन इव तमस्तोमहर्त्ता नितान्तम्।
विस्फूर्जद्विद्रुमा भो निज त····शिर सीकार मात्रस्तु सक्रो ॥
एतद्यत्रं समस्तं क्षिति वलयमिवांम्भोनिधिर्वाप्यसिद्धो।
माया वर्णाऽभिधानः स्थित इति सततं योगिभिर्ध्येय एव ॥६१॥

एतद्यन्त्रं बहिः पीठं यद्दराया व्यवस्थितम्।
जिनस्याराधकस्तत्र तस्थुर्ये तान् भणाम्यहम ॥६२॥

एकचक्ररथ उष्णमयूखः सप्तसप्तिरिह पङ्कजहस्तः।
सेवतेऽरुणरुचिः शुचिनेत्रः पार्श्वनाथ पंकजमर्क्कः ॥६३॥
क्षीरसागरतरंगसमांगः श्वेतवाजि दशकस्तु शशांक।
सर्व्वदा जिनपति क्रमसेवा संगिमानसमसावपि धत्ते ॥६४॥
मंगलोयंमथ हिंगुलवर्णः शक्तिपाणिरिह मंगलहेतोः।
भक्ति युक्ति परिभावित चित्तः सेवते क्रमयुग जिनभर्त्तुः ॥६५॥
रोहिणीरमण संभव एष बाण बाणधि शरासनपाणिः।
नीलदेह रुचिरस्य जिनस्य पादसेवन विधिं विदधाति ॥६६॥
स्वर्णकेतक सवर्ण शरीरो वाक्पति जिनपति स्तुतिकारी।
निर्जितामर सारल्ल हरीभिस्त्वर्जितामृत रसोत्तमगीर्भिः ॥६७॥
भार्गवोऽस्तु रचिताननतां हि क्षोर नीर निधि गौर शरीरः।
सेवते पदयुगं जिनभर्तुरश्वसेन कुलपंकजलानोः ॥६८॥
चण्ड दीधिति सुतोऽपि सुचेता दुःख नीरनिधि तीरगमाय।
सेवते जिनपति वत भूमस्तोम कान्तिरिह दण्डधरस्तु ॥६६॥
ही शरीर रहितोऽपिसिंहिका सुत इतोऽपि जिनेशं।
पश्यति प्रतिकलंक भक्तः स्वदन तिमिर मोह्यधिरूढः ॥१००॥

देवदेवमभि वन्दति केत्थः
पातकाम्बुनिधि बन्धन सेतुं ।
खड्गपाणिरिह पादतलस्थ
श्चित्र वर्ण इत कल्मषमालः ॥१०१॥

ये जिनं निज मनस्युरु भक्ति
व्यक्तरोम निवहांकुर सारा ।
सं वहन्ति विषमा अपि तेषां
खेचरा मुदमिवेह वयस्याः ॥१०२॥ (इति नवग्रहाः)

प्राच्यामिन्द्रो वह्निराग्नेयकोणे
याम्यासंस्थो दंडपाणिस्ततोऽपि ।
रक्षोराज स्याच्च नैऋत्यसंस्थो
यादो नाथः पश्चिमाशास्थितश्च ॥१०३॥

वायव्यस्थो गन्धवाहस्तु यक्षो
कौबेरीस्थो रुद्र ईशान संस्थः ।
ब्रह्मा प्राच्यां पश्चिमायामनन्तो
यं सेवन्ते लोकपाला दशामी ॥१०४॥(इतिलोकपालाः)

दक्षिणतो धरणेंद्रो बहुफणभृत्कनकवर्ण तनुरत्र ।
जिनभक्तं जननिवहं हृदयस्थित जिनवरः स्रवति ॥१०५॥

वाम पद्मा वत्यथ कज्जल कालद्युति स्त्रिफण कलिता ।
सर्पाभरणा कुक्कुट सर्पगतिस्त्रिभुवनं स्ववति ॥१०६॥

क्षेत्राधिपतिर्मण्डल यानो व्यालोल कुन्तल करालः ।
विहित भुजङ्गम मालः षट् पाणिः सेवतेऽत्र जिनम् ॥१०७॥

सित दीधिति समवर्णे चामर जपमालिका वर फलाढ्ये ।
विमलालंकृति वस्त्रे देव्यौ विजयाजये जयतः ॥१०८॥

श्री वामासुत भक्ते गजपति याने च कर चतुष्क वरे ।
यन्त्र बहिःकोण गते एते दुरितालिम पहरतः ॥१०९॥

अथ योजित करकमलो मन्त्राधिपतिर्जिनाग्रतो ध्येयः ।
कमठो यन्त्रद्वारे कृतस्थितिर्द्वारपाल इव ॥११०॥

अरुण रुचि शुचि महीरुह हारित्वग् विहित पीन कौपीनः ।
उच्छ्रिख पावक कीला पिङ्गल कुन्तल जटाजूट ।।१ १।।

उन्नत ललाट पट्ट प्रघटित भृकुटी कठोर कृत दृष्टिः ।
विकटाट्टहास त्रासित जगती त्रितय सत्त्व ।।११२।।

तर्जित सघन घनाघन गर्जित हुंकार राव विकरालः ।
जिनपति सकरुण वचन श्रवणोत्पन्ना समदया सुलय ।।११३।।

जय कमठ दुरित संतति गजपति
निर्दलन मृगपति तनूजः ।
अहिपति फणगणमण्डित जिनपति
चरणाम्बुरुह पुष्पलिह ।।११४। (इति कमठ)

मन्त्राधिराज सज्ञो बिहितातिशयः सदाऽशयो जयति ।
श्री पद्मदेव सूरिर्विख्यातो देवसूरिरिव ।।१ ५।

प्रोद्यन्मार्तण्ड बिम्बप्रतिरुचि भरस्यास्य यन्त्रस्य विष्वक्
सर्वज्ञाली सुरेन्द्रामर सुरयुवती यक्ष यक्षाङ्ग नानाम् ।
संदोहै सेवितस्य त्रिदशगिरि वरस्ये वरम्या वनाली ।
नीलाभाभाति भूमी विबुध जनकृता नन्द कन्द प्रभेदा ।।११६।।

।। इति तृतीय पटल ।।

अथ चतुर्थः पटलः

पूजा विधानमधुना स कलो करणादिकं च संदर्श्य ।
कल्पेभ्यो विज्ञाय प्रवक्ष्यते निज हिता या ।।१।।
मां गां ई थं वौं मं आं खं लां जं वां क्ष्विं क्षां छों ओ स्युः ।
सकलीकृते कनीष्ठाद्यङ्गुलिपर्वस्वथ तले च ।२।

अङ्गुष्ठाग्रेण प्रत्येकमार्या पूर्वार्धोक्तमन्त्रमुच्चरन् सर्वाङ्गुलि-पर्वाणि स्पृशेत् तर्जन्यग्रेण चाङ्गुष्ठपर्वाणि स्पृशेत् प्रान्तमक्षरमुच्चर-न्सर्वाङ्गुल्यग्रै करतलं स्पृशेत् ।

हर हुं हः सरसुं सो हर हुं हः पुनरथापि सरसु सः ।
सकलीकरणं कार्यं पूरावदित्थं द्वितीयमपि ।।३।।

पूर्ववद्वितीयमपि सकलोकरणं कार्यम्

सत्त्वं रजस्तमो वाङ्गुलिपर्वसु चिन्त्यते तृतोयमपि।
क्षिपॐ स्वाहा चेत्यङ्गुल्यग्रेष्वेव तुर्यन्तु ॥४॥

इति चतुर्धात्मनः परस्य च सकलीकरणं कार्यम्।

भूमि जल वसन शुद्धीर्विधिवद्विदधीत बुद्धिमान्मन्त्रैः
आह्वाननादिमुद्रापञ्चकमत्र प्रकुर्याच्च ॥५।

मन्त्रा यथा —

ॐ भूरसि भूतधात्री भूमिशुद्धि कुरु२ वों स्वाहा। इति भूमि शुद्धिः। ॐ विमले निर्मले सर्व तीर्थ जले अशुचिः शुचिर्भवामि लों वों क्ष्वीं स्वाहा इति जल शुद्धिः। ॐ ह्रीं क्ष्वीं पां वां स्वाहा। इति वस्त्र शुद्धिः। इति मन्त्रान् त्रिरुच्चरन् भूमिं जलं वस्त्राणि अक्षिभ्यां पश्यन् हस्ततलेन स्पृशेत् इति।

हृदयान्तः सूमं लात्वा स्वसमौ स्वमुखौ करौ।
कृत्वोत्ताना वधो नीत्वा मण्डलं स्थापयेदिति ॥६॥

इत्याह्वानमुद्रा

पराङ्मुखौ करौ कृत्वा हृदान्तोऽस समौ पुनः।
उत्तानौ लगयेद्यंत्रै मुद्रासौ स्थापने ति ,च ॥७॥

इति स्थापना

युक्तमुष्टिद्वयं बद्धां(बध्द्वां) गुष्ठौ मध्ये विनिक्षिपेत्।
यन्त्रस्य दर्शयेन्मुद्रां संनिरोधाख्ययेति च ॥८॥

(इनि सनिरोधेनमुद्रा,

हृदयान्तः स्कन्धसमौ सरलोर्ध्व मुखाङ्गुलो।
करौ संयोजयेच्चेति मुद्रेयं सन्निधानिका ॥९॥

(इति सन्निधान मुद्रा)

संस्पृशन्मध्यमापृष्ठमंगुष्ठाभ्यां तु तर्जनीम्।
कृत्वोद्ध्वर्वा बद्धामुष्टी च भ्रामयित्वा करौ ततः ॥
प्रत्येकं मण्डलस्यास्य हृदयाग्रमथानयेत।
अवगुंठन मुद्रेति कार्या मन्त्र विचक्षणैः ॥११॥

इति अवग ंठन मुद्रा, इति मुद्रा पञ्चकम् ।

क्षिप ॐ स्वाहा हा स्वा ॐ पक्षि रिति क्रमेण कृतरक्षः ।
अनुलोम प्रतिलोमं पज्जानूदर मुख शिरस्सु ॥१२॥

पदयोः क्षि, जानुनोः प, नाभौ ॐ, मुखे स्वा, मस्तके हा, पुन. हा, स्वा, ॐ, पक्षिरिति मस्तके मुखनाभी जानु पादेष्विति आत्मरक्षा ।

ॐ ॐ ह्रां ह्रीं ह्रीं ह्रः, पातालवासिने च धमलवयूं ।
धरणेन्द्राय स्वाहेति, मन्त्रतः शोर्ष रक्षाकृत् ॥१३॥

इति मस्तक रक्षा

ॐ ॐ यः क्षों ह्रीं फुट् २ गमलवयूं च ।
श्रीपार्श्वाय स्वाहेति बाहुकुक्षि स्वलिङ्ग कृत रक्षः ॥१४॥

(इति बाहूदरलिङ्गरक्षा)

ॐ ॐ स्वाहा कठ कठ कमलवयूं ।
ठमलवयूं च कमठाय नमो बाहु वंसयोस्तथैवं विहित रक्षः ॥१५॥

इति बाहुस्कंध रक्षा

ॐ ॐ ऐं ऐं जमलवयूं, जये विजये नमः.......... ।
इति मन्त्राद्धृदये कृतरक्षो मंत्रविधि वेत्ता ॥१६॥

इति हृदय रक्षा

पणवपुव्व च वामाए विनिअ नियजुत्त परिअर सयणे ।
मण्डलमज्झे आगच्छ तिठ तिठ्ठ य साहेति ॥१७॥

ॐ वामा एवि सपुत्ति सपरिवारे सवाहिनी माभि आगच्छ आगच्छ अत्र स्थाने तिष्ठ २ स्वाहा । इत्याह्वान मन्त्र ।

इत्याह्वानं कृत्वा, विधाय मुद्रां जिनेन्द्रपार्श्वस्य ।
क्षुद्रोपद्रव रक्षा-कृते जपेन्मन्त्रमिममेव ॥१८॥

स्व संमुखौ करौ कृत्वा, फणाभ ग्रथितांगुली ।
वक्रांगुष्ठौ क्षिपेन्मध्ये पार्श्वमुद्रेति कीर्त्यते ॥१९॥

ॐ उग्गे उग्गे मह उग्गे, उग्गजस पासे सुपासे ।
तह पास मालिनि ॐ ठः ठः साहाय इयमन्तो ।२०।

ॐ उग्गे उग्गे महा उग्गे उग्ग जसे पासे सुपासे तह पास मालिणि ॐ ठ ठः स्वाहा ।। अयं विघ्नोपशामकमन्त्रो । १०८ वार स्मरणीय ।।

यक्षा हिम्र कमठ जया, विजया पद्मावती प्रमुखमन्त्रै ।।
क्षेत्रपतेन स्मृतेन नश्यन्ति दुष्टाद्याः ।।२१ ।

मन्त्रायथाक्रमं--

ॐ ग्म्ल्व्यूँ मुद्गार त्रिशूल मुद्रया ग्राँ ग्रीँ ग्रौँ ग्रः हा छिंद २ भिंद२ विहरि२ क्ल्व्यूँ व्राँ व्रोँ व्रूँ व्रौँ हा२ ताडय२ घ्म्ल्व्यूँ घ्राँ घ्रीं घ्रूँ घ्रौँ घ्रः यूँ ब्लूँ२ ह्लँ फुट् हम्ल्व्यूँ ह्लाँ ह्लीँ ह्लूँ ह्लौँ ह्लः हा २ ह२ कठोर मुद्रयाँ ज्वल२ चालय२ प्रज्वल२ प्रज्वालय२ ॐ नमो भगवते पार्श्वयक्षाय चण्डक्रोधाय सप्त फटाय ह्लूँ क्षूँ स्रूँ स्म्ल्व्यूँ स्राँ स्रीँ स्रूँ स्रौँ स्रः हा२ व२ वज्रासि त्रिशूल धारय२ इदं भूतं हन दह२ पच२ त्रासय२ ख२ खाहि२ इदं भूतं निर्घाटय२ मन्त्रराज स्रासा-पयति ह्रूँ फुट् स्वाहा । इति पार्श्वयक्षमंत्रः । ॐ ग्म्ल्व्यूँ र रां२ ह्राँ ह्रीं ग्राँ क्रों ह्रीं क्लीं ब्लूँ द्रां द्रीं पार्श्वयक्षिणि ज्वल२ प्रज्वल२ दह२ पच२ धूमान्धकारिणी ज्वलनशिखे ह्रूँ फुट्२ य मा ॐ इति का सहिते पार्श्वयक्षिणी मन्त्रः । ॐ ॐ ह्राँ ह्रीं ह्रः पातालवासिने घ्म्ल्व्यूँ घ्राँ घ्रीं घ्रूँ घ्रौं घ्रः अनेक फण मण्डिताय धरणेन्द्राय ह्लूँ क्षूँ ह्लूँ फुट् स्वाहा इति धरणेन्द्र मन्त्रः ओ३म् ओ३म् क्म्ल्व्यूँ कठ२ पञ्चाग्नि तपः साधकाय ठम्ल्व्यूँ ह्लाँ कमठाय ह्रों ह्लूँ फुट् स्वाहा इति कमठ मन्त्रः ।। ॐ ॐ ए ऐ श्रोजये विजये हर२ सर२ मथ२ हर२ मां रक्ष २ व ह्म्ल्व्यूँ क्ष्म्ल्व्यूँ स्म्ल्व्यूँ टम्ल्व्यूँ क्ल्व्यूँ स्वाहा इति विजया जया मन्त्रः । ॐ ऐं क्लिं हस्मलीं हस्कीं हसौं देवी पद्मावती नमः । ॐ आँ हसौं हस्क्लीं हां क्षेत्रपाल इदं स्थान आगच्छ २मम चिन्तित कथय२ हां वषट् अथवा ए ह्रीं क्षाँ क्षूं क्षों क्षौं क्षः मम"......लक्षेत्रपालाय नमः इति मन्त्राः पूजासमये स्मर-णीया । इति मण्डल मन्त्रोद्धार ।

वक्ष्ये विशेषमधुनाध्यानविद्यामस्य पार्श्वनाथस्य ।
यस्मात्साधक वर्गे त्रैकाल्यं ज्ञानमाविःस्यात् ।।२२।।

क्षीराम्भो निधिमध्ये जम्बूद्वीपाभिधोऽस्ति सुद्विपः।
सुरलक्षयोजन पृथुः पृथ्वी धर तरु नदीभिरभिनील ।।२३।
अन्तर्नामानिर्गत जिन परमौ जो विकस्वरं चिन्त्यम् ।
तदुपरि गौरिक कमलं जलधिरस६४ भ्राजमानदलम् ।।२४।।
इदमुपरि कोमलतरा रुचितरागष्टिकातताश्चिन्त्या ।
पूर्वोक्तरूपमहिमा तत्रासीनो जिनोध्येयः ।।२५।।
श्री पार्श्वनाथ वामे श्वेताभरणांशुकानि बिभ्राणा ।
भुजषट्कं नेत्रत्रयमम्भोधरवर शरीर रुचिः ।।२६।।
पद्मावतीह देवी ध्यायन्ती तीर्थराजपदकमले ।
ध्यातव्या निज हृदये साधक वर्गे संपुष्टा ।।२७।।
(युग्मम्)

[इसके आगे के श्लोक मूल प्रति में नहीं है।]

तदगेहे कमलाः कलास्तु सकला देहे मलाः सिद्धयो।
विस्फूर्जे ति भजन्ति त रुगवला सौभाग्य भाग्यादयः ।।
तस्यारि प्रकरः करोत्यपि न किं रोषारुणोप्यप्रियम्।
यस्यायं कमठ शठत्वरहितोऽवश्यायवश्यंगतः ।।५८।।
(इति पूजनजप होम विधानो नाम चतुर्थः पटलः ।।)

अथ पंचम पटलः--

षट्कर्म्म मर्म्म निर्म्माण बीजान्यहमथब्रुवे।
विज्ञायानल्पकल्पेभ्यो गुरुभ्योऽभ्यासतः स्वतः ।।१।।
दिनमध्ये षड् ऋतवः षड् योगा दीपनादयः।
षडासनानि षडमुद्राः स्रजां षण्णां तु चालना ।।२।।
षड्वर्णयन्त्र षट्क च प्रभावस्तवन तथा।
एतत्सर्वं भणिष्यामि कर्म्म निष्पत्ति हेतवे ।।३।।
आदौ हि हेमन्त वसन्तरूक्षाः प्रावृट् शरत् शतो ऋतु क्रमेण।
एकैकशः स्याद्दशभिर्घटीभिरित्थं विचार्य हतु कर्मकार्यम् ।।४।
उच्चाटनं जलऋतौ शिशिरे मृति च
शाति शरद्यथ मधावश कर्षणे च।

विद्वेषणं खर·······तावथ लाल]ुष्टी
हेमन्तगे इति बुधाः सततं प्रकुर्युः ॥५॥ इति ऋतवः

साध्याभिधा प्रथमतस्तत एव मन्त्रः
वर्णक्रमस्तदिति दीपनमन्त्र शान्त्यै ।
मन्त्रक्रमः प्रथमतो·······साध्यनामा
ऽसौपल्लवः प्रकटितः कलिहेतुरेव ॥६॥
मन्त्रक्रमान्तरगतं किलसाध्यनामा-
यत्रापिसम्पुटविदं वशहेतवे स्यात् ।
साध्याभिधांतरगतोऽपि च यत्रमन्त्रो
रोधं तमाहु ररि संतति बंधनाय ॥७॥
मंत्रक्रमग्रथितमत्र च साध्यनामै-
कैकाक्षरं ग्रथनकं. त्वितिलाभतुष्टौ ।
व्यस्ताभिधाक्षरगतं तुविदर्भणाख्यं
स्तभाय शत्रुनिवहस्य वदन्ति विज्ञाः ॥८॥

देवदत्त ॐ इति दीपन, ॐ देवदत्त इति पल्लवः, ॐ देव न ॐ इति संपुटं, देव ॐ दत्तः इति रोधः, ॐ दे ॐ व ॐ द ॐ त्तः इति ग्रथना, ॐ त्त ॐ द ॐ व ॐ दे ॐ इति विदर्भणम् इति दीपनादि योग षटकम् ॥

दडासनं१ स्वस्तिक२ पङ्कजे३ च
स्यात्कुक्कुटं४ वज्र५ यतं च भद्रं६ ।
आकर्षणे१ वश्य२ वधे३ च रोधे४
शान्तौ५ तथा द्वेषविधौ६ विदन्ति ॥९॥

(इत्यासनानि)

(अपूर्ण)

चैत्यवन्दन-संग्रह

पं० कल्याणविजय विरचिता
श्रीजिन - चैत्यवन्दनचतुर्विंशति ।

श्रीऋषभजिनचैत्यवन्दनम्

(वसन्ततिलकापरनामकम् उद्धर्षिणीवृत्तम्)

श्रीनाभिराजकुलनन्दनकल्पवृक्षः,
संप्राप्तसर्वसुरपूज्यतमत्वपक्षः ।
उल्लासयन् रविरिवाङ्घ्रिसराजखण्ड,
दिश्यात्स शर्म वृषभो भवतामखण्डम् ॥१॥
त्रैलोक्यलोकचलनेत्रचकोरचन्द्रं,
वैराग्यरङ्गरसभङ्गभयास्तन्द्रम् ।
संसारसिंधुतरणाय सुयानपात्र
देवं नमामि ऋषभं प्रपवित्रगात्रम् ॥२॥
येन प्रदर्शितमशेषकलाकलापं,
दुर्बोधजातदुरितौघकृतापलापम ।
स्मृत्वाऽधुनापि जनता निजकार्यजन्मा
दुद्धर्षिणीतिहरणोऽस्तु स नाभिजन्मा ॥३॥
(इति ऋषभजिनचैत्यवन्दनम ।)

श्री अजितनाथचैत्यवन्दनम्

(तोटकवृत्तम्)

अजितं विदिताखिलवस्तुगणं,
सगणं वरमुक्तिवधूरमणम् ।
रमणीरजनीचरिकावियुक्तं,
प्रणुत प्रणताखिलसिद्धिकृतम् ॥१॥
प्रपतंतमवित्तिभरे मनुज-
मनुजन्म करंतमदृष्टरुजम् ।
जनमानसमानसहंससमं,
समदृष्टितमं प्रणमाभ्यसमम् ॥२॥

विहितामरदानव सेवनकं
कनकोज्ज्वलनिर्मलविग्रहकम्।
भवतोटक! तोटय मे दुरितं,
समयोदितकर्मरजोमिलितम् ॥३॥
(इत्यजितनाथचैत्यवन्दनम्।

श्री संभवजिनचैत्यवन्दनम्।

(उपजातिवृत्तम्)

श्रीसंभवो निर्दलितारिसंभवो,
विसंभवः प्रास्तविकार संभवः।
सशंभवश्रीद्धजितारिसंभवः,
क्षिणोतु त योऽस्ति गदोऽरिसंभवः ॥१॥
वृथैव मन्ये विदुषां नु भारती,
यया न ते प्रक्रियते बुधैः स्तुतः।
किं कल्पवृक्षोऽपि फलादिवर्जितः,
फलैषिभिर्नो विबुधैर्वितर्जितः ॥२॥
न स्रग्धरावृत्तमुखैरपि स्वयं,
सदैव सावद्यविवर्णकः कविः।
लभेत सत्कीर्तिभरं यथा स्तुवन्,
भवन्तमल्पैरुपजातिवृत्तकैः ॥३॥
(इति संभवनाथजिनचैत्यवन्दनम्।)

श्री अभिनन्दनजिनचैत्यवन्दनम्।

(रथोद्धतावृत्तम्)

संवराख्य नरराजनन्दनं, देवराजविहिताभिनन्दनम्।
धर्मदानजनताभिनन्दन, भक्तितोऽस्मि विनतोऽभिनन्दनम् ॥१॥
भो जना! विषयलुप्तचैतनैर्भोजनादिसुखमिष्यते जनैः।
तद्वदेव भवतापपीडितैर्ज्ञानसाधनमसौ निषेव्यते ॥२॥
सेवनेन सततं जिनेशितुर्मोहराजमदनौ प्रणेशतुः।
सन्नृणां भवतु वोऽपि तद्गता, तद्गुटालिरनुगैरथोद्धता ॥३॥
(इत्यभिनन्दनजिनचैत्यवन्दनम्)

श्रीसुमतिजिनचैत्यवंदनम्

(द्रुतविलम्बितवृत्तम्)

सुकृतवल्लरिवर्धनवारिदप्रभमनल्पगुणस्य तवारिद।
वचनमार्त्तिहरं भवितारकं, भवतु मेऽघहर विगतारकम् ॥१॥
सुमतिमेघनरेन्द्रसमुद्भव! विहित सर्वसुरासुरमुद्भव!!
अथ भवेद्धि भवान्मम तारणः, सजति चेद्भगवन्! ममतारणः ॥२॥
द्रुतविलम्बितसंगरणक्रममविरतं विदधे सगुणक्रम!
यदि रतिर्हि भवेद्भवदाश्रये, ध्रुवगतिं भगवन्! नु तदाश्रये ॥३॥

(इति सुमतिजिनचैत्यवन्दनम्।)

श्री पद्मप्रभजिनचैत्यवन्दनम्

(इन्द्रवज्रावृत्तम्)

पद्मप्रभेऽम्भोजविशालनेत्रे, पद्मप्रभे भो दधतां सुभक्तिम्।
येन प्रकृष्टत्वमुचः कदापि, येन प्रनष्टा ननु तेऽपि दोषाः ॥१॥
नाथ! त्वया चेत्क्रियते जनोऽन्यो, धर्मोपदेशैर्ननु मुक्तरागः।
त्वं रागयुक्तोऽसि कथं नु युद्धा, माहात्म्यमेतत्खलु सर्ववित्त्वे ॥२॥
एकाकिनापि प्रहतास्त्वयेद्धा, मोहादयः कर्मबलिष्ठयोधाः।
स्यादिन्द्रवज्राहतिरेकिकापि, नाशाय मौलेः कुलपर्वतादेः ॥३॥

(इति पद्मप्रभजिन चैत्यवन्दनम्।)

श्री सुपार्श्वजिनचैत्यवन्दनम्।

(प्रहर्षिणीवृत्तम्)

पृथ्वीजं शिवपुरसार्थवाहनाथं,
चक्राणां प्रबलमनोभवप्रमथम्।
कुर्वाणः स्तुतिलवगोचरे सुनाथं,
कुर्वे स्वं निजगुणलालसासनाथम् ॥१॥
देवेन्द्रैः प्रकटितभक्तिरागसारैः,
ससारे पुरुषवरं हि मन्यमानैः।
यो नेमे विरतगणैश्च बद्धरागै-
र्योनेमेऽविरतगतं स संरुणद्धु ॥२॥

संप्राप्ते पुरमपुनर्भवाख्यमीशे,
निर्नाथा विरहविषार्दिता प्रकामम।
नो चेत्तेऽमृतसमदर्शनं प्रबिम्बं,
नो नूनं भुवि जनता प्रहर्षिणीयम् ॥३॥

(इति सुपार्श्वनाथजिनचैत्यवन्दनम्।)

श्री चन्द्रप्रभजिनचैत्यवन्दनम्।

(ललितावृत्तम्)

चन्द्रप्रभ जनिविपूतसज्जन,
चन्द्रप्रभं जनितहृष्टिमज्जनम्।
देवाधिदेवविनतं स्वशक्तितो,
देवाधिदेवमभिनौमि भक्तितः ॥१॥

तेजः प्रपन्नरविरूपरोचन-
श्वेतः सरोजदलने विरोचनः।
देयान्मतिं जिनपतिः स तामरं,
यस्या जनुर्विभवनिर्जितामरम् ॥२॥

लोको जहर्ष तव दर्शनागमाज्-
ज्ञानप्रकर्षललिताज्जिनागमात्।
किं वा द्यु जातमहसे न नन्दन-
मीश! क्षमेशमहसेननन्दन! ॥३॥

(इति चन्द्रप्रभजिन चैत्यवन्दनम्।)

श्रीसुविधिजिनचैत्यवन्दनम्।

(सुमुखीवृत्तम्)

कुतुकमिदं ननु पश्यत भो,
भुवि जनचित्तसरोजमिदम्।
सुविधिजिनस्य मुखेन्दुरय,
कुवलयवद् विशदीकुरुते ॥१॥

भवति न यस्य मनो रमते
भवति नरस्य न तस्य रतिः।

किमु सुरपादपपादभिदि,
शमुदयमेति कदाप्यविदि ॥२॥

तव चरणाम्बुजबद्धरतिर्गणधरवन्मनुजः सुमतिः ।
भुवि जनतासु-मुखीभवति, भवभयतश्च जनानवति ॥३॥

(इति सुविधिजिनचैत्यवन्दनम् ।)

श्री शीतलजिनचैत्यवन्दनम्

(चन्द्रवर्त्मवृत्तम्)

शीतलं जिनपतिं नम जनते !,
संगृहाण वरपुण्यमजनतेः ।
एतदर्थममरा अपि सततं,
पूजनं विदधते दिवि सततम् ॥१॥

पूजयन्ति जिनदैवतचरणा-
नार्यलोकपथनिर्मितचरणाः ।
प्राणिनो विधिवदादरसहितं,
मन्वते च भुवि तत्खलु सहितम् ॥२॥

चन्द्रकान्तसमशीततनुजिन-
चन्द्र ! वर्त्म सुगतेर्ददमलम् ।
मामनल्पमतिरहितमशरणं,
नाथ ! रक्ष दुरितादनिशरणम् ॥३॥

(इतिशीतलनाथजिनचैत्यवन्दनम् ।)

श्री श्रेयांसजिनचैत्यवन्दनम्

(शालिनीवृत्तम्)

स्फूर्जत्कान्तिर्ध्वस्तसंसारतान्ति-
श्चञ्चच्छीलः प्रोज्झताऽशस्तलोलः ।
श्रीश्रेयांसः संचितान्तश्शमायः,
कुर्यात्सौख्यं देववन्द्योऽस्तमायः ॥१॥

विद्यावल्लीवर्धने वारिवाहः
कैवल्याध्वप्रापणे शस्तवाहः ।

स श्रेयांसः श्रेयसां यः सुखानि,
सश्रेयान्वः संविधत्तां सुखानि ॥२॥
प्रत्यादर्शे श्रेयसो दैवतस्य,
बद्धं चित्तं येन पापं न तस्य ।
प्रत्याघातं संविधत्ते नरस्य,
यस्मात् श्रेयः शालिनो भक्तिरस्य ॥३॥
(इति श्रेयांसजिनचैत्यवन्दनम् ।)

श्री वासुपूज्यजिनचैत्यवन्दनम् ।

(स्वागतावृत्तम्)

वासुपूज्यः कृतपुण्यकृतान्त,
हेलया विजितरागकृतान्त !
योगिनोऽपि विनमन्ति भवन्तं,
के त्यजेयुरथवा शुभवन्तम् ॥१॥
या चचाल निजनिश्चलभावात्,
योगिनाथततिरप्यविभावात् ।
यद्दशा विजयिनं हरिसूनुं,
तं जघान वसुपूज्यसुसूनुः ॥२॥
स्वागताप्रभृतिबद्धनिबन्धै-
स्त्वां स्तुवन्ति कवयः शुचिबन्धैः ।
नो तथापि गुणवर्णनकृत्ये,
पारयन्ति तव वर्णनकृत्ये ॥३॥
(इति वासुपूज्यचैत्यवन्दनम् ।)

श्री बिमलजिनचैत्यवन्दनम् ।

(मन्दाक्रान्तावृत्तम्)

श्यामासूनो ! तव वरवचः श्रेणिपीयूषधारा
तृप्तात्मानः प्रकृतिसुभगा मानवा मानधाराः ।
उत्पद्यन्ते विबुधभुवनेषूत्तमेषूत्तमास्ते,
यत्रानन्दप्रबललहरीप्रोल्लसत्सौख्यमास्ते ॥१॥

हेयाहेयप्रकटनविधौ बद्धलक्ष्यो नितान्तं,
ज्ञानोद्द्योतैर्भुवि भविजन बोधयन् यो मितान्तम् ।
निर्मुक्तात्मा शिवसुखरतिः कर्मरोगैरपीड्यः,
सर्वज्ञोऽसौ जयतु विमलः सर्वदेवैरपीड्यः ॥२॥
संसाराम्भोनिधिनवतरी दुष्टमीनैरभक्ष्या,
मन्दाक्रान्ता शमरसभरैर्दुर्मतागैर लक्ष्या ।
दत्तानन्दा भुवि जययशाविस्फुरद्वैजयन्ती,
सौख्यं मूर्तिः सुभग ! भवतो यच्छतादवैजयन्ती ॥३॥
(इति विमलजिनचैत्यवन्दनम् ।)

श्रीअनन्तजिनचैत्यवन्दनम्

(भुजङ्गप्रयातवृत्तम्)

अनन्तं जिनं पुण्यवन्तं ससन्तं,
क्षिपन्तं कुकर्मौघमर्ति हरन्तम् ।
जनान् रञ्जयन्तं रिपून्संजयन्तं,
नमामोश्वरं तं वरं मुक्तिकन्तम् ॥१॥
सदा सिद्धिसौख्यप्रियध्येयरूपं,
जितानङ्गरूपं श्रिया जातरूपम् ।
मुनिव्रातभूपं शमापारकूपं,
नमस्याम्यनन्तं जिनं योगिरूपम् ॥२॥
भुजङ्गप्रयाताऽध्वमुक्तं सुसूक्तं,
जराजन्महीनं महानन्दलीनम् ।
हतप्रीतिनाथं कृताऽघप्रमाथं
श्रयेऽनन्तदेवं सुपुण्याप्यसेवम् ॥३॥
(इत्यनन्तजिनचैत्यवन्दनम् ।)

श्रीधर्मनाथजिनचैत्यवन्दनम्

(स्रग्विणीवृत्तम्)

धर्मनाथं स्तुतप्रौढबुद्धयन्वित-
देवराजार्चितं यस्य पादद्वयम् ।

भव्यहंसैः श्रितं पुण्यगन्धाश्रितं,
राजते पद्मशोभां परिह्लासयत् ॥१॥

धर्मनाम ! त्वयोद्दिष्टधर्मे कृत-
वर्तनाः कर्तनायोत्कटद्वेषिणाम् ।

स्युर्जनाः सेव्यसे त्वं ततः स्वार्थिभि-
र्देवराजासुरैः केवलस्वार्थिभिः ॥२॥

स्रग्विणी भक्त चेतस्तमश्चूरिका,
पूरिका स्वर्गनिःश्रेयसां सपदाम् ।

मूर्त्तिरेवंविधा ते यशः साधिका,
दीयतां भद्रमानन्दवासाधिका ॥३॥

(इति धर्मनाथचैत्यवन्दनम् ।)

श्री शान्तिजिनचैत्यवन्दनम्

(मालिनीवृत्तम्)

शिवपदसुखकारी कर्मविद्वेषिवारी,
मदनमदविभेदी विश्वस्त्वैकवेदी ।

भवजलधिविशोषी पापवारप्रमोषी,
दिशतु कुशलमीशः शान्तिनाथो मुनीशः ॥१॥

स्वहृदि धृतभवन्तः प्रास्तरागा भवन्तः,
तव नतिशुभवन्तस्ते नरा पुण्यवन्त ।

अतिशयसुखसारं केवलालोकसार,
परमपदमुदारं यान्ति भव्या मुदाऽरम् ॥२॥

प्रशमरसविपुष्टा नाशिताशेषदुष्टा
जगति जनितचित्रा पुण्यपोषं पवित्रा ।

महिमजितसमुद्रा मालिनी यस्य मुद्रा,
स जयति जिनशान्तिर्निर्जितस्वर्गकान्तिः ॥३॥

(इति शान्तिनाथचैत्यवन्दनम् ।)

श्री कुन्थुनाथजिनचैत्यवन्दनम्

(कामक्रीडावृत्तम्)

संसृत्तारं विध्वस्तारं श्रीदातारं धातारं,
चञ्चच्छोभारम्यं गम्यं योगीशानामीशानाम् ।
ससाराम्भाराशि तीर्णं सौख्याकीर्णं विस्तीर्णं,
वन्दे देवं कृत्यासेव कुन्थुं सार्वं सर्वज्ञम् ॥१॥

त्यक्तासारं ज्ञानोदारं विश्वोद्धारं विद्यारं,
स्फूर्जद्योगं मुक्तोद्योगं भासा चन्द्रं निस्तन्द्रम् ।
सख्यावन्तं पुण्योदन्तं कीर्त्या कान्तं संशान्तं,
वन्दे देवं दत्तासेवं सौधर्मेशे धर्मेशे ॥२॥

आयुर्विद्युद्द्योताभं स्वर्लीलां कीलाभामन्ते,
विज्ञा विज्ञायाशु क्रीडां कामक्रीडां संप्रोज्झ्य ।
दुःखोद्रेकच्छेदच्छेकं भवरयुद्रेकं बिभ्राणा,
देवाः सेवां यस्याऽकुर्वन्कुन्थुः कुर्यात् कल्याणम् ॥३॥

(इति कुन्थुजिनचैत्यवन्दनम्)

श्री अरनाथजिनचैत्यवन्दनम्

(हरिणीवृत्तम्)

जनितजनतानन्दं कन्दं महोदयवीरुधा-
मविरतिरतिप्रीतिप्रौढिप्रमुक्तमगुर्बुधाः ।
यममशरणा लब्धोत्कर्णाः शरण्यमनिन्दितं,
स दिशतु शिव देवीसूनुर्भवान्तमनिन्दितम् ॥१॥

अतुलजवना बद्धस्पर्द्धाः सुरासुरनायका,
यदभिगमने लब्धोत्कण्ठा भवन्त्यविनायकाः ।
अरजिनपतेः पादद्वन्द्वं सरोजविकस्वर,
दलमतुतरां पापद्वन्द्वं प्रभाजितभास्करम् ॥२॥

शुभमतिजनस्वान्तध्वान्तप्रणाशनभास्करं,
विदलितदरद्वेषाऽज्ञान विरागसमादरम् ।

हृदयहरणैर्हावैः क्षुब्धेतरं हरिणीदृशां,
हृदयममलं देवीसूनोस्तनोतु सुखं विशाम् ॥३॥
(इत्यरजिनचैत्यवन्दनम् ।)

श्रीमल्लिनाथजिनचैत्यवंदनम्

(वरतनुवृत्तम्)

अयि हितकारक ! मल्लिनाथ ! ते,
चरणयुगं सुरपोऽपि नाथते ।
भवजलतारण शक्तिमत्परं,
द्रुतमभितारय मामतः परम् ॥१॥
अयि नतवत्सल ! नापदां पदं,
भवति जनो भवतां श्रितः पदम् ।
किमु कृतकल्पमहीरुहार्चनः,
समजनि दुर्गतकः कदाचन ॥२॥
भवदभिधाजपबद्धमानसे,
ननु भुवि भव्यजने समानसे ।
वर ! तनुताद्वरमर्त्तिनाशनं,
पदमितवन्नविवर्त्तनाशनम् ॥३॥
(इति मल्लिनाथजिनचैत्यवन्दनम् ।)

श्रीमुनिसुव्रतजिनचैत्यवन्दनम्

(कनकप्रभावृत्तम्)

मुनिसुव्रतस्य भववारिधेः परं,
तटमागतस्य तरसा विधेः परम् ।
स्तवनां करोतु जनता शुभाशया,
शिवसाधनाप्तिरसिका शुभाशया ॥१॥
प्रवरप्रतापपरभाव भावितं,
भविनं करोति परभाव भावितम् ।
विमल यदीयचरणद्वयं सतां,
विमलां ददातु परमां रमां सताम् ॥२॥

कनक प्रभाव ! भवदागमागम !
सुकृतोदयेन भवदागमागमः ।
समपद्यतात्महितकारणं मम,
भवनाशनं भवतु तेन निर्मम ! ॥३॥

(इति मुनिसुव्रतजिनचैत्यवन्दनम् ।)

श्रीनमिजिनचैत्यवन्दनम् ।

(प्रमाणिकावृत्ताम्)

सकर्णकर्णतोषिणी, हिताऽऽहिताऽधिसंस्कृतिः ।
सदा सदानवैः सुरैर्नुता नु तायिनी नृणाम् ॥१॥
नयानयादिराजिता — ऽगमैर्गमैर्गरीयसी ।
प्रमाप्रमाणपूरिता, महर्षिहर्षिणी सदा ॥२॥
दयोदयोज्ज्वला सदाऽक्षयाऽक्षयामिनी विशाम् ।
धियोऽधियोगकारिणी, भियोऽभियोगनाशिनी ॥३॥
यदीदृशी सरस्वती, न रोचते सरस्वती ।
जनाय ते सुवर्णिका जगद्दृशासुवर्णिका ॥४॥
नमे! न मे प्रमाणिका नरस्य धीस्तदीदृशः ।
मतं मतं विपर्यय-प्रसाधनं नु धीदृशः ॥५॥
(पञ्चभिः कुलकम्)

(इति नमिनाथचैत्यवन्दनम् ।)

श्री नेमिजिनचैत्यवन्दनम्

(पञ्चचामरवृत्तम्)

क्षणं निरीक्ष्य वीक्षणैः प्रतिक्षणं क्षयान्वितं,
क्षणं यदप्रतीक्षितं क्षमेशमण्डलैः क्षितौ ।
असारसंसृदुद्भवातिभीतिभाग्जनो यमा-
श्रयेद्धिताय भक्तितस्तमानतोऽस्मि नेमिनम् ॥१॥
कुरंगरङ्गभङ्ग भीरुताभरावभारित !
निदर्शनी भवन् दयालुताजुषां विशां धुरि ।
विवाहवाहवाहनावरुद्धराज्यहायक !
भवन्तमीदृशं दयालुमाश्रितोऽस्मि रक्ष माम् ॥२॥

जयाभिलाषिवाजिराजिराजिराजराजिता-
प्रपञ्च ! चामरालिशोभिपार्श्व ! पार्श्वगावन !
यदूज्ज्वलान्वयाम्बुराशिभासनाऽब्जभासुर !
विधेहि मां भवाम्बुधेस्तटानुयायिनं विभो ! ॥३॥

(इति नेमिजिनचैत्यवन्दनम् ।)

श्रीपार्श्वजिनचैत्यवन्दनम्

(शिखरिणीवृत्तम्)

सदा शुद्धा मूर्तिर्मदनमदमोहादिविकला,
कलाऽपूर्वा वाक्ये सुतनुमदविद्यान्तकरणे ।
रणे रङ्गो नित्यं विततभवभावारिनिधने,
धने मूर्च्छात्यागः वरतरसुवर्णादिनिकरे ॥१॥

करे शस्त्राभावो जनितजनसंतापशमनो,
मनोऽपूर्वध्यानस्थगितनिखिलाऽवद्यविवरम् ।
वरं धर्मस्थैर्यं भुवनविदिता कापि समता,
मता मह्यां मैत्री तनुमदधिवात्सल्यसहिता ॥२॥
हिताधाना एतेऽतुलसुकृतसंभारजनिता,
नितान्तं राजन्ते भवति सुगुणाः पार्श्व ! सुतपः ।
तपस्त्रस्यच्छैत्यं किरण विसराऽस्ताऽन्धतमसं,
मसं मोघीकुर्वन्नवरविरिव प्राक्शिखरिणि ॥३॥
(इति पार्श्वजिनचैत्यवन्दनम् ।)

श्री वीरजिनचैत्यवन्दनम्

(शार्दूलविक्रीडितवृत्तम्)

वीरः सर्वहितः सदोदितसुखं वीरं जनालिः श्रिता,
वीरेण प्रविताडिता रिपुततिर्वीराय धत्ते नतिम् ।
वीराद्विश्वमहोदयो धृतजयो वीरस्य वीर्यं महत्,
वीरे विस्तृततां गता गुणलता वीर ! प्रदेयाः शिवम् ॥१॥
यो मुक्तिश्रियमातनोति सुदृशां यं स्वर्गनाथा नता,
येनाऽभेद्यविभेद्यकर्मनिकरो यस्मै जनःश्लाघते ।
यस्माद्दुर्गुणसंततिर्गतवतो यस्य प्रपूतं वचो,
यस्मिन्पङ्कजकोमले जनमनो भृङ्गोपमं लीयते ॥२॥

स श्रीवीरविभुर्भवत्वसुखहृत्तं दैवतं संश्रये,
तेनास्मि प्रभुणा सनाथगण नस्तस्मै नतिं संदधे,
तस्मान्नास्ति परः प्रभादिनकरस्तस्य ह्रियुग्मं स्तुवे,
तस्मिन्नेव च कर्मदन्तिदलने शार्दूलविक्रीडितम् ॥३॥ युग्मम् ।

अङ्गर्षिनवभूवर्षे पादलिप्तपुरे वरे
कल्याणविजयेनेयं चतुर्विंशतिका कृता ॥

(इति मुनिकल्याणविजयविरचिता चैत्यवन्दनचतुर्विंशतिः समाप्ता)

पण्डित कल्याणविजयविरचितम्

श्रीगणधरजयघोषस्तोत्रम्

(आर्यावृत्तम्)

त्रिभुवनजनाभिलाष-
प्रपूरणप्राप्तकल्पतरुसमतः ।
ममताविकल्पविकलो,
भुवनहितो जयतु वीरजिनः ॥१॥

जयतु सुधर्मा गणभृत्
जम्बूर्जयतु प्रकामकामरिपुः ।
प्रभवोऽपि विभुर्जीयात्,
जीयात् शय्यंभवोऽपि गणी ॥२॥

अनुयोगभृतामाद्यो,
जयतु यशोभद्रसूरिरमलमतिः ।
श्री संभूतविजयकः,
सभद्रबाहुश्च संजयतु ॥३॥

कोशाप्रबोधजननो,
जयतु श्रीस्थूलभद्रमुनिरचलः ।

जयतामार्यमहागिरि-
सुहस्तिनौ प्रथितकीर्तिभरौ ।।४।

सुस्थितसुप्रतिबुद्धौ,
जयतां श्रीइन्द्रदिन्नसूरिश्च ।
जयतु श्रीदिन्नसूरि-
रतुलबलो जयतु मुनिवृषभः ।।५।।

सिंहगिरिर्गणितिलको,
जीयाद्वज्रोऽपि जयतु वज्रसमः ।
श्रीवज्रसेनसूरि—
जयतु जनाम्भोजभानुनिभः ।।६।।

श्रीचन्द्रसूरिमुनिपो
जीयात्सामन्तभद्रगणिराजः ।
जयतु विवृद्धगुणौघो,
वृद्धोऽसौ जयतु देवगुरुः ।।७।।

प्रद्योतनो विजयतां,
जयतात् श्रीमानदेवसूरिरपि ।
श्रीमान्तुङ्गसूरि-
र्जयताज्जयताच्च वीरगुरुः ।।८।।

जयतु श्रीजयदेवो,
देवान्दोपि सूरिरभिजयतु ।
विक्रमसूरिर्जीयात्,
जीयान्नरसिंहसूरिश्च ।९।

जीयात्समुद्रसूरि-
र्जीयात् श्रीमानदेवसूरिरपि ।
विबुधप्रभो विजयतां,
जयतात्सूरिर्जयानन्दः ।।१०।।

जयतु रविप्रभसूरि-
र्जयतु यशोदेवसूरिरमितगुणः ।

श्रीप्रद्युम्नो जीयाज-
ज्जीयाच्छ्रीमानदेवोपि ॥११॥
श्रीविमलचन्द्रसूरि-
र्जयतादुद्योतनः प्रभुर्जयतात् ।
श्री सर्वदेवसूरि-
र्जयताज्जयताच्च देवगुरुः ॥१२॥
सूरीशसर्वदेवो,
जयतु यशोभद्रनेमिचन्द्रगुरू ।
जयतां नतमुनिचन्द्रः,
श्रीमुनिचन्द्रो गुरुर्जयतु ॥१३॥
सूरिरजितदेवाख्यो,
जयतु विजयसिंहसूरिरथ जयतु ।
सोमप्रभमणिरत्नौ,
सूरीशौ गुणिवरौ जयताम् ॥१४॥
श्रीजगच्चन्द्रसूरि-
र्जयतु जनानन्दवल्लिवारिधरः ।
देवेन्द्रोऽपि विजयतां,
जयताच्छ्रीधर्मघोषगुरुः ॥१५॥
सोमप्रभो विजयतां,
जयताच्छ्रीसोमतिलकसूरिगुरुः ।
श्रीदेवसुन्दरगणि-
र्जीयाज्जनहृदयकमलरविः ॥१६॥
श्रीसोमसुन्दरगुरु-
र्जयतु मुनिसुन्दरोऽपि जयतुतराम् ।
श्रीरत्नशेखर गणि-
र्जयतु जनान्दकन्दलनः ॥१७॥
लक्ष्मीसागरसूरि-
जयतु सुमतिसाधुसूरिरपि जयतु ।

जयतु हेमविमलाह्वो,
जयतादानन्दविमलगुरुः ॥१८॥
जयतु विजयदानाख्यो,
जयतु श्री हीरविजयसूरिरपि।
जयतु विजयसेनः श्री-
विजयदेवोऽपि जयतुतराम् ॥१९॥
श्री विजयसिंह सूरि-
र्जयतु जयतु सत्यविजय गणिराजः।
जयतु कर्पूरविजयो-
जयतु गणिः श्रीक्षमाविजयः ॥२०॥
श्रीजिनविजयो जयता-
दुत्तमविजयोऽपि जयतु जनविदितः।
जयतु गणिपद्मविजयो,
जयतु श्रीरूपविजयोऽपि ॥२१॥
विजयतां कीर्तिविजयो,
जयतात् कस्तूरविजयगणिराजः।
जयतात् श्रीमणिविजयो,
जयतुतरां सिद्धिसूरिरपि ॥२२॥
ज्ञानादिधर्मरूपः,
शिवपुरमार्गः प्रदर्शितो येन।
स श्रीकेसरविजयो,
मदीयदीक्षागुरुर्जयतु ॥२३॥
एष गुरुक्रमरूपो,
जयघोषो वर्णितः समासेन।
निधिवसुनवशशिवर्षे,
मुनिना कल्याणविजयेन ॥२४॥

इति गणधरजयघोषस्तोत्रं सम्पूर्णम्।

श्री विजयसिद्धिसूरि-चरितषोडशकम्

[श्री कल्याणविजयगणि संदब्धम् ।]

१ आशीर्वचन चरितम्—

योभारतीयमुनिसंघशिरोऽवतंसः,
राजत्सु राजनगराब्जविहारहंसः ।
दादाभिधानविदितः सकलेऽपिसंघे,
भूयात् स भद्रततये भुवि सिद्धिसूरिः ॥१॥

२–३ जन्म-प्रव्रज्याचरिते—

अश्वीन्दु खेट महि मण्डित वत्सरेऽसौ,
जातः सुराजनगरे नररत्नपूर्णे ।
तत्रैव वेद शिवनेत्र निधीन्दुवर्षे,
त्यक्त्वा रमां च रमणीं च तप, प्रपेदे ॥२॥

४-५ गणिपद-सूरिपद चरिते –

अङ्कस्मरेषु निधि भूमितवत्सरे यः,
सूर्यात्पुरे गणि-विदोः पदयुग्ममाप्तः ।
बाणर्षि खेट शशि संमित हायने च,
सूरेः पदं स महिषाण पुरे प्रपेदे ॥३॥

६ विहार चर्या चरितम्—

सौराष्ट्र-लाट-मरु-मालवमेदपाट,
देशा हि गुर्जर मुखाश्चरणारविन्दैः ।

पूताः स्मरन्ति पुनरागमनाय यस्य,
संदर्शनाय गणिनोऽस्य गुणाकरस्य ॥४॥

७ उपदेशप्रभावचरितम्--

येनोपदेशवचनैर्विविधैस्तपोभि,
रुद्बोधितानि मुनिगेहि कदम्बकानि ।
आजीवितान्तमधि जाग्रति धर्मकृत्ये-
ष्वाराधयन्ति किल सिद्धिमपि क्रमेण ॥५॥

८ वासक्षेपप्रभावचरितम्-

यत्पाणिवासवशजातविशुद्धभावा,
दावानलाभभववासमपास्य मर्त्याः ।
उद्भासयन्ति मुनिमार्गमपास्तमोहं,
निर्वापयन्ति भव ताप निबन्धनानि ॥६॥

९ शास्त्रसंशोधनचरितम्-

येन प्रमादरहितेन परोपकृत्यै,
संमार्जितानि कविबन्ध सुमौक्तिकानि ।
कोश स्थितेषु भजतेऽक्षयभावमेषः
कण्ठस्थितेषु खलु तेषु विराजतेऽज्ञः ॥७॥

१० प्रतिष्ठाप्रभावचरितम्-

चारूप-पार्श्वसर-भोगिनि-मातरादि,
तीर्थेषु येन विहिताजिनपप्रतिष्ठाः,
जाता जयाय जगतो विजयाय संघे,
सेयं प्रभावकणिका गुरुगौरवस्य ॥८॥

११ सूरिमन्त्र जाप चरितम्-

श्री गौतमादि गणिवृन्द विचारपूतं,
भूतादि भाव भयभञ्जकरं कलाढचम् ।
त्रिर्वारमस्त वृजिनोऽथ जिनोपदिष्टं,
मन्त्रं जजाप स सुधीः प्रबलप्रतापम् ॥९॥

१२ पर्वतिथिविचारचरितम्–

नो जैन टिप्पणक मस्ति जिनागमोक्त,
श्रीसिद्धसेन गणिवाक्यमिदं विभाव्य ।
लोकान्तरोऽपि किल लौकिकटिप्पणेन,
कार्यस्तपो विधिरिनोदयपर्वबद्धः ॥१०॥

श्रुत्वा यदीय मुख निर्गतमे तदाज्ञा,
वाक्यं विहाय तिथिपर्वविराधकत्वम् ।
श्री हीरसूरिचरितां तिथिपर्वपद्या-
मालेभिरे बहुजनाश्चिरकालवृत्ताम् ॥११॥

१३ चातुर्मासिक-वार्षिकतपश्चरितम्-

वर्षर्तु वास समयेऽधिक निर्जरार्थी,
ह्येकान्तरोपवसनानि सदावितेने ।
तप्तानि वत्सर तपांसि बहूनि तोष-
धैर्यक्षमाक्षपितकर्ममलानि येन ॥१२॥

१४ तपोविशेष चरितम्–

वार्द्धक्यमेति निकट हृतदेहतेज-
स्तूर्णं तरामि भवनीरनिधिं स्वशक्त्या ।
मत्वेति गाढधृततीव्रतपोरुपोत-
श्चित्तं निधाय परमात्मपदे विशुद्धे ॥१३॥

त्रिंशत्समाः समधिका गतवत्य एव-
मेकान्तरोपवसनानि वितन्वतोऽस्य ।
षष्ठाष्टम प्रभृति दीर्घतपांसि चास्य,
शक्नोति को गणयितुं गणनाचणोऽपि ॥१४॥

१५ अप्रमादचरितम्–

वर्षाणि सप्तनवतिर्जनितो गतानि,
श्रामण्यलाभदिनतोऽग्निमुनिप्रमाणि ।
ज्ञानार्जने तपसि योगविधौ क्रियासु,
अद्यापि जाग्रति गुरोर्महिमोऽर्जितानि ॥१५॥

१६ दर्शनवन्दनफलचरितम्-

धन्यास्त एव तव दर्शनवन्दनाभ्या-
मासादयन्ति निजजन्मफलं मनुष्याः ।
अस्मादृशैस्तु गुरुदर्शनयोगवन्ध्यैः,
कल्याणसिद्धिद, गुरो शरणं किमेष्यम् ॥१६॥

परमगुरु पं० श्रीसिद्धिविजयसूरिस्तुत्यष्टकम्

शिखरिणीवृत्तम्

धुनानो मूर्च्छारात्रिबृहिततमः संघमुदयाऽ-
चले वा पट्टे यः सुकृतकथनाऽऽरम्भसमये ।
स्थितो भाति स्वीयैर्दिवसपतिवज्ज्ञान-किरणैः,
स रक्ष्यात्पापेभ्यो निखिलजनतां सिद्धिविजयः ॥१॥

निशाम्याऽऽस्यं यस्याखिलजनमनो हारिनयनं
विधुर्दध्रे यत्नं तदनुकरणं कर्तुमनिशम्
गतोऽशक्तो वोच्चैर्गगन शिखरान् मङ्क्षु पतित,
स वः शर्म पुष्यान्मुनिगणगुरुः सिद्धिविजयः ॥२॥

सदाचारैर्ध्येयोऽप्यतिकुलजनैर्निर्मितमहः:
सुमाधूनां सेव्योऽपि च कुयतिनां चित्तमदकृत् ।
सकामो निष्कामोऽप्यसमवदनो वादितिलकः,
सदान-दस्थानं दिशतु भविनां सिद्धिविजयः ॥३॥

ध्रुवं येनाऽदाहि ज्वलिततरसद्ध्यानशिखिना,
द्रुतं कामक्रोधोल्बणमदविपल्लोभप्रभृति ।
न चेदभ्रव्याजाद्वियदुपलसेद्धूमपटलैः,
स वो नीयान्मुक्तेर्गहनसरणिं सिद्धिविजयः ॥४॥

सुधासाम्यं धत्ते विहितविबुधाऽऽनन्दनिकरं,
वचः प्राप्तं यस्याऽखिलतनुजुषामक्षविषयम् ।
विनाश्याऽघं सर्वं गतमृति ददन्निर्जरपदं,
जगद्बधुर्दिश्यात् स सुकृतभरं सिद्धिविजयः ॥५॥

तपःपादैर्दीप्ते विहितकुमुदानन्दविशरे,-
प्रतापाऽर्के यस्य प्रसरति जगन्मोहतमसाम् ।

तमिस्रा वा पंक्तिः शमितसुकृताऽभूदवसिता,
मुनीन्द्रो वः पुष्यात्स सुखलतिकां सिद्धिविजयः ॥६॥

शिवं दातोदात्तो दलितजनसंतापनिवहः,
सदानन्दी नन्दी भविजनमनोऽम्भोजवितते:
रविर्भव्यो भव्योल्बणकलिकलाखण्डनविधौ,
स वो धीरो धीरो भवतु शमिनां सिद्धिविजयः ॥७॥

सुराद्रिर्वाऽद्रिर्वाऽऽचरति महिमाऽऽरामहिमरुक्,
सुधीर्येनाऽयेनाऽखिलजनकृते धैर्यकलया ।
भिदाऽऽलोकालोकाऽघगणतमसां स्वस्य समुदा
द्रुतं दाता दाता भवतु खमखं सिद्धिविजयः ॥८॥

स्तवनमिति प्रमोद्दं सत्सभासप्रमोदं,
पठतु नृहितरङ्गं पुण्यवार्द्धौ तरङ्गम् ।
मुनियशसि सुमेघं धर्मवीरुत्सु मेघं,
वृजिनहरणकारं - भूरिकल्याणकारम् ॥६॥

श्रीकीर्तिचन्द्रमुनिस्तुत्यष्टकम्

प्रशान्तिमार्गाऽनुगतः प्रशान्त-
तमास्तत श्वेतकरप्रकाशः ।
संप्रीणिताऽशेषचकोरचेताः,
श्रीकीर्तिचन्द्रो बिजयं बिभर्तु ॥१॥

शुभोदयं पूर्णकलं प्रवृद्ध-
पुण्यालिचेतो विहरन्तमीशम् ।
गवां भरैः कौ मुदमेधयन्तं,
श्रीकीर्तिचन्द्रं नमत प्रयत्नात् ॥२॥

प्रसर्पिपुण्याऽमृतनिर्भरेण,
प्रह्लादिना सत्सुमनोवरेण ।
लोकेषु शांतिं ददता जनोऽयं,
श्रीकीर्तिचन्द्रेण भवेत्सनाथः ॥३॥

शुभौषधीशाय लसन्महिम्ने,
महामहीमण्डलमण्डनाय ।

कंदर्पकोद्भेदनकारणाय,
श्रीकीर्तिचन्द्राय नमः कुरुध्वम् ॥४॥

सुवृत्तताशीतलताजनोप-
कारित्वनैर्मल्यप्रसन्नताऽऽद्यैः।
गुणैरतुल्यैरमितैरवापि,
श्रीकीर्त्तिचन्द्रादपरं न धाम ॥५॥

अनन्यसादृश्यकलां यदीया-
मप्राप्नुवञ्शक्रपुरोहितोऽपि।
ययौ तदर्थं किमु लेखशालां,
श्रीकीर्त्तिचन्द्रस्य विनौमि तस्य ॥६॥

महेशमौल्यञ्चितपादपद्मे,
हृतप्रदोषे शुचिचन्द्रकान्ते।
विराजमाने दिविसत्प्रतिष्ठे,
श्रीकीर्तिचन्द्रे भवतात् सुभक्तिः ॥७॥

सौम्य! प्रकृत्या शुभदृष्टिधारिन्!,
सद्राशिचारिन्! शुभकार्यकारिन्!!
महादशासंस्थितसौख्यकारिन्!,
कल्याणकारिञ्जय कीर्त्तिचन्द्र! ॥८॥

इत्थं गीतगुणो गुरुर्गुणगणैर्गाङ्गेयनीरोज्ज्वलै-
श्चञ्चच्चित्रचरित्रचारुचरणैश्चेतश्चमत्कारदः।
कल्याणावलिवल्लिपल्लवविधौ संवादिवारिप्रद-
स्तत्त्वातत्त्वविवेचनो विजयतां श्रीकीर्त्तिचन्द्रो मुनिः ॥९॥

अथ स्वगुरु श्रीकेसरविजयचरित-स्मृतिः

जयति गुरुः स कलावान्,
यत्करपातेन भवति निस्तापम्।
मादृक्षशिष्यचातक-
शिशुहृदयं शोक संतप्तम् ॥१॥

जयति सदा मरुदेशः
शेरगढाभिधपुरं च यत्र गुरुः।

उदितः स्वकुलाकाशं,
चन्द्रवदुद्द्योतयामास ॥२॥
ऊकेशवंशभूषा-
मणिनिभयोर्ज्येष्ठमल्लवनदेव्योः ।
आत्मभवः कुलदीपः,
समजायत रामचन्द्राख्यः ॥३॥
निधिशशिनिधीन्दुवर्षे, (१९१९)
यो जातो वर्धितश्च जनिभूमौ ।
महिषीवाटे पुनरधि-
गतविद्यो जैनयतिपार्श्वे ॥४॥
तत्रैव संनिवेशे,
वेदानलनिधिशशाङ्कमितवर्षे । (१४३४)
त्रिस्तुतिमतगुरुपार्श्वे,
धृतदीक्षो रङ्गविजयोऽभूत् ॥५॥
द्वितीयवर्षे शुचिसित-
दले द्वितीयातिथौ च भृगुदिवसे ।
जावालिपुरेऽजायत्,
च्छेदोपस्थापना यस्य ॥६॥
तस्मिन्नेव च समये,
गुरुणा 'श्रीकीर्त्तिचन्द्र' इति नाम्ना ।
यस्याऽभिधानमप्रथि,
'श्रीकेसरविजय' इति रुचिरम् ॥७॥
मरुमालवादिभूमौ,
विहृत्य येन प्रबोधिता जनता ।
श्रीजैनधर्ममार्गे,
प्रवर्त्ततेऽद्यापि हितकामा ॥८॥
द्विक-शर-निधीन्दुवर्षे,
श्रावणशुक्ले तिथौ तृतीयायाम् ।

जावालिपुरे त्रिस्तुति-
मतमजहाद् यः स्वगुरुसहितः ॥९॥

यस्याऽभिराममूर्ते-
र्दर्शनलाभो ममाऽभवत् प्रथमः ।
ग्रामे देलदराख्ये,
युग-रस-निधि-चन्द्रमितवर्षे ॥१०॥

तत्र पुरे वर्षेऽपि च,
माधवशुक्ले तिथौ तृतीयायाम् ।
येन दयाञ्चितमनसा,
दत्तो मे मातृकापाठः ॥११॥

तत आरभ्य निरन्तर-
मध्यापयता सदागमं येन ।
वर्षयुगावधि विधिना,
बिहितो मे बोधिलाभोऽपि ॥१२॥

वेद-रस-ग्रह-भूमित-
वर्षे राधस्य शुक्लशष्ठ्यां यः ।
जावालिपुरे रम्ये,
दीक्षां मे दत्तवान् जैनीम् ॥१३॥

सिंहासनदुर्गपुरे,
वर्षावासं विधाय प्रथमपदे ।
व्याकरणाध्ययनं मे,
पण्डित पार्श्वादकारयत ॥१४॥

शर-रस-निधि-शशिवर्षे,
साद्रौ शुचिसिततिथौ दशम्यां मे ।
छेदोपस्थापनिका—
मदापयत् सिद्धिविजयकरात् ॥१५॥

तस्यैव गुरोः पार्श्वे,
स्वयमपि लात्वोपसंपदं परमाम् ।

चिरवाञ्छितगुरुयोगो,
जातः संविग्नपथपथिकः ॥१६॥

सिंहासनदुर्गे पुन—
रागत्याऽपाठयच्च मामग्रे ।
शब्दानुशासनाख्यं,
व्याकरणं हेमचन्द्रकृतम् ॥१७॥

गत्वा गूर्जरदेशे,
स्थित्वा महिषाणके च भृगुकच्छे ।
शास्त्रं न्यायाभिख्यं,
शाब्दमपि च पाठयाञ्चक्रे ॥१८॥

श्रीपादलिप्तनगरे,
गत्वा स्थित्वा च नन्दमितमासान् ।
वैशेषिकमतशास्त्रं,
नूतनमधिपाठयामास ॥१९॥

आगत्य मरौ पुनरपि,
जावालिपुरेऽतिवाह्य वर्षर्तुम् ।
विचरन् ग्रामे ग्रामे,
सिंहासनदुर्गमधितष्ठौ ॥२०॥

रुग्णशरीरत्वेन च,
चातुर्मास्यद्वयं विधायाऽसौ ।
तत्रैव पुरे स्वर्गति—
मासादितवान् समाधियुतः ॥२१॥

चन्द्रर्षि-ग्रह-भूमित-
वर्षे फाल्गुनसितद्वितीयायाम् ।
स्वर्गमितो मे स गुरुः
श्री केसरविजयनामिमुनिः ॥२२॥

तस्मै नमोऽस्तु गुरवे,
केसरविजयाय लब्धविजयाय ।

यत्करस्पर्शमणिना,
लोहं कल्याणतामगमत् ॥२३॥

इति स्वगुरुचरितस्मृतिः।

महोपाध्यायगणिश्रीयशोविजयाष्टकम्

(वसन्ततिलकावृत्तम्)

श्री–जैनशासननयामृतपूरसिन्धौ,
य –श्चारुचन्द्रककलां कलयाञ्चकार।
शो–भामनन्यसदृशं सुदृशां विधाता,
वि–द्यानिधिर्वरयशोविजयः स वन्द्यः ॥१॥

ज –न्तूपकारकरणं करणाग्निवारि,
य–न्नाममन्त्रमनुसृत्य जनावलीयम्।
जै–नोदयाय यतते सततं प्रवीणा,
न–प्रान के भुवि यशोविजयं नमेयुः ॥२॥

सं–बोधबन्धुरधुरीणहृदा मुदा सं –
स्कृ–त्याभियुक्तिततिमागममार्गवृत्त्या।
त– *त्कालमद्भुतमतीन्विबुधान्विजेत्रा,*
पा–ण्योऽन्यना किमु यशोविजयेन तुल्यां ॥३॥

ठ–प्रौढिमानमखिलं परिखण्डयन्तं,
शा–स्त्रौघमुत्तममतीनमनोहरन्तम।
ला–भप्रदं कृतवते यतमानसाय,
म–न्ये नतिं ननु यशोविजयाय कुर्याम् ॥४॥

हे–य प्रकाशनपटिष्ठवरिष्ठशुद्धेः,
शा–शासितुः सुपटुवादिवरेण्यबुद्धेः।
न–म्राशयैर्बुधगणैर्नतपादपद्मात्,
पु–ष्टप्रभः किमु यशोविजयाद्विदोऽन्यः ॥५॥

री–ज्यानियुक्तमनसोऽमतिशोधनस्य।
या–प्यप्रवृत्तिपवनस्य यशोधनस्य।
चि–त्रप्रपूतचरितोचितधर्मवृत्ते —

रं--हो विनश्यति यशोविजयस्य नाम्ना ॥६॥
स-त्काव्यशक्तिवशसाधित वाणिमन्त्रे,
मे-धा प्रकर्षपरिभावितसर्वतन्त्रो ।
ध-र्मध्ववीरवरतानृपपूज्यताद्यां,
तां-तां निबोधत यशोविजये गुणालीम् ॥७॥

भू--भूषण ! प्रतनुकर्मकृतोपकार !,
व--र्य ! प्रपन्नतपसां यतमानमुख्य !!
ल--ब्धोदय ! प्रवरपण्डितमण्डिताहे !,
ये--यं तवावतु यशोविजय ! प्रशस्तिः ॥८॥

इत्थं लेशविवर्णितोर्जितगुणग्रामो गुणिग्रामणी-
रुद्गीताद्भुतभूरिभाग्यविभवो वैदुष्य-विद्याश्रयैः ।
कल्याणांकुरवर्धने जलधरः प्रोद्यत्प्रभावाकरः,
श्रीमान्न्यायविशारदो विजयते स्वर्नाथमान्योऽधुना ॥ ९॥

इति मुनिकल्याणविजयविरचित श्रीयशोविजयाष्टकम् ।

श्रीहीरविजयसूरिपादुकाष्टकम् [हेमविजय कृतम्]

श्रीमान् कामगवीवकामितसुखं सूते स्मयः सेवित-
श्चक्रे यः सवितेव विश्वमखिलं सालोकमालोकितः ।
विद्यावानिव पापतापमहरद्यः संस्तुतः सूरिराट्,
सिद्ध्यै तस्य मुनीन्द्रहीरविजयस्यानंदिके पादुके ॥१॥

सच्चक्रप्रणया पयोरुहवनं भावानिवाभीश्रुतिः,
प्रीतस्वल्पकलापिकः ऋषिभरं तोयऽस्तडित्वानिव ।
विश्वं विश्वमतोषयत्स्वचनैर्यः पुण्यानैपुण्यथीः,
सिद्ध्यै तस्य मुनींद्रहीरविजयस्यानंदिके पादुके ॥२॥

आलाकं विलसत्समस्तकमलामोदं गभस्तेरिव
स्तोमं तोयमुचामिवास्ति भुवनानंदप्रदं श्रेयसा ।
यं लोको बहुमन्यते स्म सकलः सर्वत्र सोवाप्तदृग्,
सिद्ध्यै तस्य मुनींद्रहीरविजयस्यानंदिके पादुके ॥३॥

स्वाज्ञावर्त्तिषु मंडलेषु निखिलेश्वानंदतोऽचीकरत्,
प्रीतो यद्वचनैः ऋपावनघनैः शाहिहुमाऊसुतः ।

जीवानामभयप्रदानपरहोद्‌घोषानघध्वंसिनः,
सिद्धयै तस्य मुनींद्रहीरविजयस्यानंदिके पादुके ॥४॥

श्रीमान्‌ शाहि अकब्बरक्षितिपतिर्यद्‌वाग्भिरानंदितः,
कृत्वा त्वाकरमुक्तिमुक्तिमनघां बिभ्रद्दौ दक्षिधीः।
तीर्थं जैनजनाय तीर्थतिलकं शत्रुंजयोर्व्वीधरं,
सिद्धयै तस्य मुनीन्द्रहीरविजयस्यानंदिके पादुके ॥५॥

स्वं गाढाग्रहिणं कदाग्रहमघांकूरं विहाय स्वयं,
भूपाका ऋषिमेघजीप्रभूतयः श्रेयोऽर्थिनोभ्येतराः।
भृंगवं बिभरांबबभूवुरनिशं यत्पादपाथोरुहे,
सिद्धयै तस्य मुनींद्रहीरविजयस्यानंदिके पादुके ॥६॥

चैत्याद्योद्धरणैर्व्रतानुसरणैः सन्माभदानोत्सवै,
रेकच्छत्रमिवाभवद्भगवतां सद्वासनं शासनम्।
येऽस्मिन्‌ श्री तपगच्छ वल्लिजलदेऽलंकुर्वति क्ष्मातलं,
सिद्धयै तस्य मुनींद्रहीरविजयस्यानंदिके पादुके ॥७॥

श्रीवत्सध्वजमत्स्यवज्रकुलिशछत्रांकुशांभोरुहां-
भोधिस्वस्तिकचामरद्विपनिपद्वीपादिचिह्नांकिते।
ये नित्यं नमतां भवंति वशगा राज्यर्द्धयः सिद्धय-
स्ते सूरेस्त्रिदशसुते सुजयतामानंदिके पादुके ॥८॥

प्रत्यूषे प्रतिवासरं प्रगुणिताप्रौढप्रमोदः पुमा
नेतत्स्पष्टकमष्टकं पठति यः कृत्वैकतानं मनः।
सौभाग्यादिगुणौघरत्नखनयः क्रीडंति तस्यौकसि,
प्राज्ञाः प्रीणितपुण्यहेमविजया नंदादिसंपत्तयः ॥९॥

इतितपागच्छाधिराज श्री हरीविजयसूरीश्वरपादुकाष्टकं संपूर्णम्।

श्री जिनस्तोत्रसंग्रहः

श्रीमहावीरस्तवः

(विविधच्छन्दोनिबद्धः)

आर्याऽधिपः स वीरो,
वचोविशुद्ध्यै ममामरैरर्च्यः ।
यद्गीर्गीर्वाणसरिति,
कृतप्लवैर्भूयते विजरैः ॥१॥
त्वं वीर ! लोकशरणं,
शरणं रत्नत्रयस्य भववार्धेः ।
तरणं जगतस्तरणि-
स्तरणिस्त्यागीति बोधने भविनाम् ॥२॥
त्वत्पदकंजभूतिलिप्तकान्,
वैतालीयमपि प्रभो ! भयम् ।
मनुजान्नहि बाधते तदा,
नागादेस्तु कुतो विबाधनम् ॥३॥
वक्त्रं ते वीक्ष्य शीताऽऽभ,
कारकं कौमुदाऽऽह्लत्तेः ।
प्राप्नोति नहि किं मोदं,
नरो जडाशयश्चापि ॥४॥
अमरनरगणनतपदकजयमल !,
सकलभुवनजनहितकर सुचरण ! !
समदमदनकरिविषमनख ! विमद !
वितर सुखमचलधृतिमति सुविरति ॥५॥
येन जिनेश ! सभां द्रुतमध्याऽऽ—
गतमनुजेन तवाऽऽस्यमलोकि ।
मुक्तिरमा तमपीच्छति चेतसा,
तव चरणाम्बुरुहं किमु मुञ्चेत् ॥६॥
आख्यानकीर्तेरपि ते जिनेश !,
भवन्ति लोकाः किल कीर्त्तिभाजः ।

यद्वा न चित्रं भुवि किंवदन्तो,
भुवेन्नु यच्चेतसि तन्मयः स्यात् ॥७॥

कनकप्रभा जिनपते तवाऽऽकृति-
र्ददती मुदं सुरनरादिदेहिनाम् ।
अवलोकितैव दिविषद्‌गिरेरपि,
भवति स्म किं न सुमुदे मनोरमा ॥८॥

सकृदपि सुकृतेन येन ते,
वदनर्मांशि नरेण मुक्तिदम् ।
विनिहृतकुमतिः स वीक्षते,
किमपरवक्त्रमनङ्गविक्रियम् ॥९॥

प्रमाणिका जिनेन्द्र ! ते,
सु भारतो सुरैर्नता ।
श्रुतौ गता न जायते,
न कामवैरिणी ध्रुवम् ॥१०॥

भुजगशशिभृता भूति-
स्तव पदकजनुत्याऽऽपे ।
उत भवति न किं जल्पः,
सुरनति महतां सेवां ॥११॥

चम्पकमालाभाक्तव मूर्तिः,
संहरतीशांहस्तनुभाजाम् ।
धर्ममथो दत्तेऽमृतवासं,
प्रापयति व्यापारवती सा ॥१२॥

उपेन्द्रवज्राधिपती नराश्च,
नमन्ति यत्त्वत्पदपङ्कजेभ्यः ।
न मेऽद्‌भुतं तद्‌भुवनैकनाथ !,
निजार्थसिद्धयै न हि के यतन्ते ॥१३॥

भूमीन्द्रवशार्णवशीतदीधिते !,
त्रायस्व लोकान् यमवक्त्रकोटरात् ।

नाऽन्यः समर्थो जिन ! भावशत्रुतः,
कर्तुं जनो रक्षणमत्र भूत्रये ॥१४॥

द्रुतविलम्बितमध्यगतिर्भवेत्,
स्वजनितस्य मलीमसकर्मणः ।
इति ममापि तथैव भवेद्ध्रुव-
मव ततो दुरिताच्चपलं मम ॥१५॥

ताँल्लोकान् भवजलधौ निमज्जतोऽह-
मालोक्याऽहमपि तथैव चेति भीतः ।
श्रुत्वा त्वामलमतितारणाय तेषां,
बुद्धिर्मे भवति ततः प्रहर्षिणीयम् ॥१६॥

दुष्कर्मभूपतिरमात्यवरश्च मोहः,
सिंहोद्धता कुमतिवेत्रधरी च यत्र ।
दुर्नीतिधाम च कषायकुभृत्यवर्गः,
सौख्यं प्रभो ! भवपुरे न मयाऽत्रदृष्टम् ॥१७॥

नरपतिरपि देव ! प्राप्तवान्यो न सेवां,
तव पदजलजानां निष्फलं तस्य जन्म ।
जगति भवति धन्या मालिनी सैव यस्याः,
करचितसुमनोभिः पूज्यते तेंऽह्रियुग्मम् ॥१८॥

अशोकदेव पुष्पवृष्टि दिव्यनाद दुन्दुभि,
गतप्रपञ्च ! चामरं तथाऽऽसनं प्रभाऽऽस्पदम् ।
सिताऽऽतपत्रमित्यमीभिरष्टप्रातिहार्यकं-
निषेव्यसे त्वमीश साधकः सदेव सिद्धिभिः ॥१९॥

नमद्भव्याम्भोजावलिविकसनं कुर्वति सति,
निविश्याऽऽसन्याऽऽशूदयशिखरिणोवाऽऽर्यवचनैः ।
पदाद् भ्रष्टं ज्ञात्वा निजमिव ययौ त्वत्पदकजं,
रविर्वानाऽऽश्चर्यं भवति महतां भूतिरनघा ॥२०॥

तावके जनने प्रमोदितनिर्जरावलिभिर्मुदा,
चर्चरीमुरजाऽऽनकादिसभेरितूर्यगणस्य ते ।

आहृतस्य मनोऽपहृत्य ददुर्न कस्य मुदं रवा,
दर्शनाय च ते व्यधुर्न कमुत्कमोश ! जन जवात् ॥२१॥

नष्टाः कामकषायमोहसुभटाः शार्दूलविक्रीडित
कर्मद्विट्समराङ्गणे धृतवति त्वय्येककेऽमि द्रुतम्।

हत्वा कर्मनृपं ततश्च विदधे निष्कण्टकं निर्वृते-
मार्गं तत्र गतश्च लब्धकुशलो जातोऽसि मुक्तामयः ॥२२॥

जननोत्सवाय तवेन्द्रनुन्नचतुर्निकायसुरैर्नति
विदधद्भिरीश ! गणेन निर्जरयोषितामथ गीतिकाः।
वरगायता परिपूरिते नरलोक आशु शशङ्किरे,
मनुजा नृधाम्नि सुराऽऽलयोरगधामनी नु समागते ॥२३॥

भव्या भव्याऽब्जषण्डेऽर्यमकिरणततिः शर्मदामामदामाऽ
पायात्पायाद् मनुष्यान्प्रतिकृतिरथ ते भूतिदात्रीतिदात्री।
नव्या नव्याऽमरेन्द्रै भवसलिलनिधौ नौर्जितारातिजितारा,
वारीत्रारीतिवल्लौ मदनमदनदात् स्रग्धराऽवाधरा वा ॥२४॥

भद्रं कर्म विकृत्यभेदकुठरः सारप्रभाऽविक्रियः,
सत्कल्याणरतप्रनष्टकुमतिः शस्तप्रमाजन्मभूः।
यं प्रीणन्त्यभिवीक्ष्य तेपि कुमताः सोऽवः सदायप्रभुः,
दत्तां वै भविनां सदक्षयमलो यः सर्वभूशर्मदः ॥२५॥
(चक्रबन्धः)

(इति समाप्तः)

नमस्कारमन्त्रकवचितः श्रीआदिजिनस्तवः

नताऽमरं विश्वविवेकहेतुं,
मोहान्तकं रागहरिं जिघत्सुम्।
अनन्तविज्ञानपदं कुकर्माऽ-
रिक्रन्दनं नाभिसुतं स्तवानि ॥१॥

हंसो जगद्बोधनतश्चिदात्मा,
तातो जगत्पालनतो भवाब्धेः।
णं रान्नृणां यो विजहार दीर्घं,
नमामि तं सिद्धगिरेर्वतंसम् ॥२॥

मोहादिभूमीधवचक्रवालं,
सिद्धाचलेशस्य तथा न राज्ये ।
द्वादिर्न धातुर्भुवि धातुपाठे,-
णंकारपूर्वो नहि सिद्धशब्दः ॥३॥

नन्दन्ति भव्या भुवि चञ्चरीका,
मोदं लभन्ते च तथैव धीराः ।
आस्याऽम्बुजं वीक्ष्य लसच्छवीक,
यदीयमानन्दकरं सुराणाम् ॥४॥

रिरंसुमप्याश्वरिरं सुबुद्धि
या भारती यस्य करोति लोकम् ।
णं रान्तमादीश्वरमात्मरूपं,
नमामि विश्वैकविभाकरं तम् ॥५॥

मोदं दक्षनः प्रणमन्नरेभ्य,
उज्झन्नघं पादयुगं श्रितानाम् ।
वरं प्रमोदं मुनिपः स दद्या-
ज्झाङ्कारकृद्भृयोऽब्जमिव प्रफुल्लम् ॥६॥

यामो वयं मित्रगणै हि शीघ्रं,
णं प्राप्नुमो नाभिसुतं निरीक्ष्य ।
न कं ब्रुवाणा इति देवतेषा,
मोदं निबभ्रुस्तव केवलाऽऽप्तौ ॥७॥

लोकीय ! योगीय ! सुरीय ! गुण्य !
एषोऽस्तु दूरे तव भक्तिलेशः ।
स प्रत्ययोऽप्यानतभूपते ! ति-
ष्वत्कस्य नास्तीह गुणस्य हेतुः ॥८॥

सानन्दचित्तैस्तव जन्मनीश !,
हूहूभिराताडिततूर्यनादः ।
णंकारभांकारमुखो न चक्र,
एवं नभोवर्त्मविलोचनं कम् ॥९॥

सोऽपि त्वया संहृतिमापितोऽ हो,
पंचेषुकः श्रीर्जननी यदीया ।
चतुर्भुजो यस्य पिता प्रसिद्धो,
नमोऽस्तु ते वीतभयाय तस्मै ॥१०॥
मुनीश ! त्वत्सापि रतिस्तु तां धि–
क्कालं गते जीवति जीवितेशे ।
रोषादितीव प्रणनाश यस्मात्,
सभक्ति तुभ्यं प्रणमामि नित्यम् ॥११॥
व्वव्वेति यः संकथनेऽप्यशक्तः,
पादाम्बुजं सोऽपि तवाऽऽप्य भक्त्या ।
वशंवदब्रह्मसुतश्च किनाऽ—
प्पतिर्वं गाम्भीर्ययुताऽऽशयः स्यात् ॥१२॥
णाऽऽनन्दकारोऽसि तथाऽप्रपञ्चः,
सस्नेहमूर्ति विगतस्पृहोऽपि ।
णोपाधिकत्वे निरुपाधिकत्व-
मंहोविभर्दिस्तव चित्रमेतत् ॥१३॥
गजारिरप्येति यदीयदेह-
लावण्यराशौ प्रशमं निमज्जन् ।
णं वः स दद्यात्प्रविधूतपाप्मा,
चतुर्गतिच्छेदनधर्मदेशी ॥१४॥
सतामघानामभिनाशकः स्त्राक्,
व्वेत्ता जगद्भावमनारतं यः ।
सिंहासनस्थो नहि कैः प्रणेमेऽ-
परद्वितीयेन्दुरिवाशु लोकैः ॥१५॥
ढक्कारवोत्कण्ठितयोषिदोघोऽ-
मंस्तात्र हि त्रैदशसौख्यलीलां ।
हतान्धकारे तव दीक्षणाहे,
वज्रयाज्ञया ताडिततूर्यरामे ॥१६॥

इन्द्रेन्दुचक्रेशमहीपतीना–
मशुप्रभो ! रुद्रबलादिकानाम् ।
गताऽगसां मौलिरजोऽभिरक्ताऽ–
लंपद्द्युतिस्ते जनताः पुनातु ॥१७॥

इति स्तुतः श्रीपरमेष्ठिमन्त्र–
वर्णादिपद्यैः प्रभुरादिनाथः ।
सिद्धाचलस्थापितपुण्यमूर्तिः,
करोतु कल्याणसुखं जनेभ्यः ॥१८॥

श्री सुविधिनाथस्तोत्रम्

(द्रुतविलम्बितवृत्तम्)

सुविधिनाथजिनेश्वरसेवनं,
भविकभृङ्गमनोमहसे वनम् ।
ददनारतमिद्धयशोधनं,
प्रविदधेऽशुभमानसशोधनम् ॥१॥
विजिततामरसं भ्रमदायकं,
सजनतामरसंभ्रमदायकम् ।
भजत भव्यजना ! जिननायकं,
चरणयुक्शुभनिर्वृतिनायकम् ॥२॥
द्रुतविलम्बितमध्यमयानकै–
र्विततकर्मभरैरवियानकैः ।
सकिमदाहि जनो विपुलालस–
स्तव पदाम्बुनिषेवणलालसः ॥३॥

(इति सुविधिनाथजिनस्तोत्रम् ।)

श्री शीतलजिनस्तोत्रम्

(रथोद्धतावृत्तम्)

शीतलं मलयजातिशीतलं,
नन्दनं दृढरथस्य नन्दनम् ।
दर्शनादिगुणकल्पभूरुहं,
दर्शनाय प्रति यान्तु सज्जनाः ! ॥१॥

विद्यते प्रशमलालसा यदि,
विद्यते ! तत इमं निषेवताम् ।
येन मे भवति तापहीनता,
ये नमेयुरमर्वजिता हि ते ॥२॥

यस्य जन्मसमये द्युजातपाः,
स्वागतं विदधतेऽविजातपाः ।
कृत्तराग ! जनता तवानति-
कृत्तराऽस्ति विभवैर्रथोद्धता ॥३॥
(इति श्रीशीतलजिनस्तोत्रम्)

अथगुप्तकारकं नाम जिनस्तोत्रम्

(अनुष्टुबवृत्तम्

जिनेन्द्र तव पादाब्जं, शुभसा रविराजितम् ।
भजन्ते विगतम्लानि, पद्मपुष्पमिवाऽलयः ॥१॥–(कर्तृ गुप्तम)
देवलोकमनोहारि-त्वदास्यनिर्गतं वचः ।
करोति शान्तसंतापं, वारिवाहो महीमिव ।।२।। (कर्मगुप्तम्)
तारकेनास्ति मे भक्ति-स्त्वयि विश्वैकवत्सले ।
जातापि खण्डिता पूर्वं, मया तार्यः कथं भवः ॥३॥ (करणगुप्तम्)
प्रणतिक्रियया युक्ता, भवन्ति ते महोदयाः ।
अरूपविग्रहायेन, नमन्ति ते ज्ञशेखराः ॥४॥ (सम्प्रदानगुप्तम्)
समादरं जिने कुर्याद् विशेषं यः सुखार्थिकः ।
मनोऽभीष्टप्रसिद्धयर्थं, सेव्यश्चिन्तामणिर्यतः ॥५॥
(अपादानगुप्तम्)
मुक्तिसौख्याशया येन, भवत्यागो विधीयते ।
यदि नमेद् भवन्त स, तदा मोक्षो न दुर्लभः ॥६॥
(अधिकरणगुप्तम्)
जिनेन्द्रस्तवमानन्द – दर्शनं सुमतिः सदा ।
करोति भवदावाग्नि – पुष्करावर्तसोदरम् ॥७॥ (संबन्धगुप्तम्)
जिनोनास्ति शुभश्रेणि-र्मदीयहृदयाम्बुजे ।
तेनेयं यातुधानीव, विपत्तिरनुधावति ॥८॥ (आमन्त्रितगुप्तम्)

गुप्तकारैकभावस्य, गुप्तकारकसंज्ञितः ।
जिनेन्द्रस्य स्तवः कुर्यात् कल्याणं शुभचेतसाम् ॥६॥
(इति गुप्तकारकाख्यं जिनस्तोत्रम्)

* * *

श्री विंशतिविहरमाणजिनस्तोत्रम्

(उपजातिवृत्तम्)

सीमन्धरं मन्दरधीरभावं,
युगंधरं बाहुजिनं सुबाहुम् ।
जम्बूविदेहाद्भुतचन्द्रसूर्यान्,
हतान्धकारान्प्रणमामि भक्त्या ॥१॥
देवं सुजातं नतनाकिजातं,
स्वयंप्रभं प्रास्तविरोचनाभम् ।
जिनेन्द्रचन्द्रं वृषभाननं त-
मनन्तवीर्यं विजितारिवीर्यम् ॥२॥
सुरप्रभं श्रीलविशालवज्र-
धरौ च चन्द्राननमष्टसंख्यान् ।
श्रीधातकीखण्डललामभूतान्,
जिनेश्वरान्नौमि सुपुण्यपूतान् ॥३॥ युग्मम् ।
श्रीचन्द्रबाहुं गुणिसार्थनाथं,
भुजङ्गनाथं कृतमारमाथम् ।
श्रीईश्वरं मुक्तिरमाहृदीशं,
नेमिप्रभं भव्यमयूरमेघम् ॥४॥
श्रीवीरसेनं नतमानवेनं,
जिनं महाभद्रमभद्रभेदम् ।
कल्याणदौ देवयशोऽजितादि-
वीर्यौ स्तुवे संप्रति पुष्कराद्धे ॥५॥ युग्मम् ।
(इति विहरमाणजिनस्तोत्रम्)

श्री चतुर्विंशतिजिनस्तोत्रम्

(रथोद्धतावृत्तम्)

आदिनाथमजितं सुसंभवं,
संभव विनयतोऽभिनन्दनम् ।
संस्तवीमि सुमतिं मतिप्रदं,
पद्मकान्तिमथ कान्तविग्रहम् ॥१॥
श्रीसुपार्श्वशशिलाञ्छनौ जिनौ,
संप्रणौमि सुविधीशशीतलौ ।
खड्गिलक्ष्मवसुपूज्यनन्दनौ,
जंगमौ दिविजपादपौ भजे ॥२॥
अर्चयामि विमलं जिनं तथाऽ
नन्तनाथमधिदैवतं परम् ।
धर्मशान्तिजिननायकौ स्तुवे,
कुन्थुनाथमरनाथमाश्रये ॥३॥
मल्लिनाथमुनिसुव्रतौ नमि-
नेमिनौ स्तवनगोचरं नये ।
पार्श्वनाथमभिनौमि नित्यशो,
वर्धमानमभि वर्द्धितं गुणैः ॥४॥
अर्हर्निशं देवनराधिनाथैः
स्मृताः स्तुताः पूजितवन्दिताश्च ।
जिनाश्चतुर्विंशतिरीशितारो,
भवन्तु कल्याणविवर्धनाय ॥५॥

(इति चतुर्विंशतिजिनस्तोत्रम्)

श्री पञ्चपरमेष्ठिस्तोत्रम्

(उपजातिवृत्तम्)

विशुद्धविज्ञानभरोपपन्नाः,
परोपकारप्रवणा जनेभ्यः ।
कुर्वन्ति ये धर्मपथप्रदानं,
जयन्तु ते तीर्थकराः पृथिव्याम् ॥१॥

अनेकजन्मार्जितपापपङ्कं,
प्रक्षाल्य भावेन जलोज्ज्वलेन ।
महोदयस्थानमपूर्वरूपं,
गता शरण्या मम सिद्धदेवाः ॥२॥

जिनेन्द्रदेवादिमपुत्रकल्पा,
अनल्पवीर्याजितमुक्तितल्पाः ।
आचार्यवर्याः शुभधर्मचर्याः,
शुभाय भूयासुरदोषधुर्याः ॥३॥
सिद्धान्तवार्द्धेः परिमन्थयत्ना,
गृहीततत्त्वार्थमहार्घ्यरत्नाः ।
तदीयदानार्जितभूरिपुण्या,
जयन्त्युपाध्यायवराः सुपुण्याः ॥४॥
तपः कृशाङ्गाः कृतधर्मसङ्गा,
महाव्रतारामधृतप्रसङ्गाः ।
निष्कारणं भव्यसखा मुनीन्द्राः,
कल्याणमार्गाभिमुखा जयन्ति ॥५॥

(इति पञ्चपरमेष्ठिस्तोत्रम्)

श्रीनवपदस्तोत्रम् ।

(आर्या)

अरिहंते भगवन्ते,
तित्थयरे दलियकम्ममम्मथले ।
वरअइसयकयसोहे,
जणबोहे सायरं वंदे ॥१॥
कम्मट्ठयपविणासण-
पाउब्भूएहिं अट्ठहि गुणेहिं ।
संजुत्ता जे पहुणो,
ते सिद्धे भावओ वन्दे ॥२॥
पडिरूवाइगुणिड्ढे,
पवयणसिद्धे सुवण्ण समणिड्ढे ।

पुज्जपए आयरिये,
वंदामो विउल भत्तीए ।।३।।

इक्कारसअंगाणं,
बारसुवंगाण मुणियपरमत्थे ।
अज्झयणज्झावणविहि-
कुसले वरवायगे वंदे ।।४।।

मणगुत्ता वयगुत्ता,
सरीरगुत्ता तहेव समिइजुआ ।
सुविसुद्धचरणकरणा,
साहुवरा दितु कल्लाणं ।।५।।

सगसट्ठि भेयकलियं,
दुग्गइविणिरुंभणे महाबलियं ।
सुहायपरिणइरूवं,
सम्मद्दंसणमभिथुणामि ।।६।।

जीवाऽजीवाइपय-
पयासणं नासणं भवसयाणं ।
णायगभावसमप्पिअ-
लरकणमभिवंदिमो नाणं ।।७।।

चयरित्तकरणजोगा,
कम्मणो भणियमन्नयत्थजुअं ।
चारित्तं ति सुहेयर-
पवित्तिविणिवत्तियं वंदे ।।८।।

बज्झंतरगुणजणणं,
नियाचियस्सावि कम्मणो हणणं ।
जिणवरमयप्पसिद्धं,
भयह तवं तं इमं सिद्धं ।।६।।

नवपयगुणगणकलिअं,
थुत्तमिणं भणइ जो सया भविओ ।

कल्लाणपयगइं सो,
पावेइ ध्रुवं न संदेहो ॥१०॥

(इति नवपदस्तोत्रम्)

श्री शत्रुञ्जयमहातीर्थस्तोत्रम्

(द्रुतविलम्बितवृत्तम्)

विमलकेवलबोधदिवाकरो,
जिनपतिर्नृपनाभिभवो विभुः ।
नवतिपूर्वमितं श्रितवान्यकं,
नमत तं सततं विमलाचलम् ॥१॥
अजितनाथमुखा अपि तीर्थपा,
गतमलाः कमलाश्रितपत्कजाः ।
यमभिचर्य शिवं सुखमाप्नुवन्,
नमत तं सततं विमलाचलम् ॥२॥
मुनिवराः समताम्बुसरोवरा,
धृतिधरा गुणरत्नमहाकराः ।
परमधाम ययुर्यदधिश्रिता,
नमत तं सततं विमलाचलम् ॥३॥

(इति श्री शत्रुंजयस्तीर्थस्तोत्रम्)

श्रीगिरिनारगिरिस्तोत्रम्

(तोटकवृत्तम्)

यदुवंशनभोहिमदीधितिना,
वसुधावसुधारमपास्य रयात् ।
चरणं जगृहेऽत्र शिवाङ्गभुवा,
नमताऽत इमं गिरिनारगिरिम् ॥१॥
घनकज्जलरुक्कमनीयतनु-
र्यतनुत्यपदाम्बुरुहद्वितयः ।
इह केवलमाप स नेमिजिनो,
नमताऽत इमं गिरिनारगिरिम् ॥२॥

विहिताऽमृतसंगमहोदयता,
शिवशर्मविलासमहोदयता ।
वरितेह जिनेन शिवाङ्गभुवा,
नमताऽत इमं गिरिनारगिरिम् ॥३॥

धृतिधूतकुकर्मकलङ्कमलाः,
कमलामपुनर्भववासगृहाम् ।
वृणतेऽत्र सुधामनि योगिगणा,
नमताऽत इमं गिरिनारगिरिम् ॥४॥

सुरकिन्नर खेचरराजनतः,
स्वकदर्शनपावितसज्जनतः ।
नतदेहिहितं यदसौ कुरुते,
नमताऽत इमं गिरिनारगिरिम् ॥५॥

इत्थ स्तुतो रैवतनामधेयो,
धरधिराजो धरणीप्रसिद्धः ।
कुर्याज्जनं भक्तिभरावनम्रं,
योग्यं सुकल्याणपरंपरायाः ॥६॥

(इति गिरिनारगिरितीर्थस्तोत्रम्)

श्रीसुवर्णदुर्गस्थजैनचैत्यस्तोत्रम्

(उपजातिवृत्तम्)

श्रीआदिनाथादिजिनेन्द्रबिम्ब-
प्रतिष्ठिताऽपूर्वपवित्रशोभम् ।
सुवर्णदुर्गाभरणायमानं,
चतुर्मुखाख्यं जिनचैत्यमीडे ॥१॥

यस्यातितुङ्गत्वविलोकनेन,
तारङ्गचैत्यं स्मृतिमार्गमेति ।
श्रीनाहडाह्वाननरेन्द्रकाल-
भवं स्तुवे तज्जिनवीरचैत्यम् ॥२॥
अन्यच्च पार्श्वाख्यजिनेन्द्रधाम
स्फुरद्यशोराशिमिवोज्ज्वलश्रि ।

वन्दारुकल्याणविवृद्धिहेतुं,
नमामि संसारसमुद्रसेतुम् ॥३॥
(इति सुवर्णदुर्गस्थजिनस्तोत्रम् ।)

साधारण जिनस्तवः

(कवालीरागेण गीयते)

गतास्ते दुःखमयदिवसा,
गता सा दीनता कष्टा ।
समाप्ताऽनादिभवयात्रा,
गतोऽस्मि स्वं पदं कुशली ॥१॥

अहो संसारकान्तारे,
मयाऽद्य भ्राम्यताऽदर्शि ।
जगद्धितकारिसद्बुद्धि-
र्जिनाख्यः सार्थपतिरेषः ॥२॥

अलोक्याऽऽलोकनाऽपूतं,
ममेदं दृष्टियुगमद्य ।
पवित्रीभावमापन्नं,
जिनेश्वर ! दर्शनाद् भवतः ॥३॥

त्वदीया भक्तिरल्पाऽपि,
विधत्ते पातकं विफलम् ।
यथा वह्नेर्लवो दारू-
च्चयं क्षणमात्रतो दहति ॥४॥

भव दाताऽथवा कृपण-
स्तथापि मे त्वमेवासि ।
तवाग्रे सत्यमिति भाषे,
कदाचिन्नैव याचेऽन्यम् ॥५॥

न मेऽर्थो वैबुधैर्लाभै-
र्न वा भूपालभोगाद्यैः ।
इदं तु याच्यते भगवन् !,
वसेर्मम मानसे सततम् ॥६॥

यदि त्वन्नामदीपोऽयं,
मदीयं द्योतयेद् हृदयम् ।
तदा निजरूपसंसिद्धे-
र्भवेत् कल्याणपदगमनम् ।।७।।

(समाप्तः)

स्तुतिसंग्रहः

श्रीवीरजिनस्तुतिः

(आर्याछिन्दः)

सो जयउ जगाणंदो,
वीरजिणो सयलगुणगणालीढो ।
जस्स विलीणा सव्वे,
रागद्दोसादओ दोसा ।।१।।

अन्नाणतमविणासण-
रविकप्पे कप्परुक्खतुल्लकरे ।
अज्झप्पधम्मकुसले,
जिणचन्दे वंदिमो सिरसा ।।२।।

तिहुअणगिहगयवत्थु-
प्पयासपवणो कुमारुआगम्मो ।
एगंतसलहदाहो,
जिणागमो दीवओ जयउ ।।३।।

सिरिवरोभत्तिभावा,
गयपावा दलियविग्घसब्भावा ।
कल्लाणमग्गलाभं
जणस्स सिद्धाइया कुणउ ।।४।।

(इति श्री वीरस्तुतिः)

श्रीआदिजिनस्तुतिः ।

(शौरसैन्याम्)

द्रुतविलम्बितवृत्तम्

पुरवपुण्णभरादु समज्जिय,
नरभवं विभवं चिदमन्दिरं ।
निजहिदं जदि इच्छध माणवा !,
नमध नाभिसुदं जिणनायगं ॥१॥
दलिददुक्खभरा समदादरा,
विरदिधम्मपसाहणतप्परा ।
जिणवरा जणपंकजभक्खरा,
सुगदिदा मम होन्तु सदक्खरा ॥२॥
गमगहीरजलो नयसोहिदो ।
विविहभंगवियारविराइदो ।
चदुरबुद्धिविगहिदमज्झगो,
सुमदिदो मम भोदु जिणागमो ॥३॥
कडुय घोरउवद्दवणासणं,
जणमण करिदूण विकस्सरं ।
कुणदि जो जिणणाधमदुन्नदिं,
हरदु सो दुरिदं मम गोमुहो ॥४॥

(इत्यादिजिनस्तुतिः)

श्री शांतिजिनस्तुतिम्ः

(मागध्याम्)

मालिनीवृत्तम्

दुलिदयणिदकस्टं दुस्तिदिं दुक्खवेय्यं,
कुणदि गलिदशत्तं ये नलाणं वलाणं ।
यणिदभुवणशंती कुस्टिदाशेशभंती,
दिशदु यणहिदं शे शतिनाधे अणाधे ॥१॥
शददकमलवाशुव्विग्गचेदा लमा शा,
अवलविमलवाशाभावमाबोहमाणी ।

चलणकमलमालं येसिमाणन्द-शालं,
शलणमधिगदा ते दिन्तु मुरकं यिणिंदा ।।२।।
पलिमिदनियतेया जाहऽणांनं पयाशं
पलिकलिय तदस्तं पस्तिदा शोमशला ।
अणहिगदतदस्ता अंतलिंके भमंति,
दिशदु विमलविय्यं आगमो शे यिणाणं ।।३।।
कदयिणमदशाले शंतिभत्तें गपाले
गयवलगदिशाले धस्तविग्घप्पयाले ।
णियचलणशलोये भिगभावं भयन्ते,
हलदु विमलकंती पावगं बंभशंती ।।४।।

(इति शान्तिनाथस्तुतिः)

श्रीनेमिजिनस्तुतिः

(पैशाच्याम्) उपजातिवृत्तम्

तूरातु तत्थून पसुप्पकारं,
तयालतापोसनबद्धचित्तो ।
गेन्हीअ यो तिक्खमभग्गसीलो,
सुखाय सो नेमिजिनो जनानं ।।१।।
अञ्ञानअंधीकतलोचनानं,
विवेक हीनान सता जनानं ।
भवन्नवे ये वरयानतुल्ला,
छितंतु ते तुक्खभरं जिनिता ।।२।।
संसारगेहे वरतीपकाभो,
महेसिनं झत्ति वितिण्णलाभो ।
अपुव्वतत्तोघविसालतेहो,
जिनागमो सव्वहितो जयेज्जा ।।३।।
नेमीसभानातु सुपत्ततेव-
भवा भवारन्नविलंघनत्थं ।
जिनिततेवं परिसेवमानी,
विवेकिनं होतु सुखाय अंबा ।।४।।

(इति श्रीनेमिनाथस्तुतिः)

श्री पार्श्वनाथजिनस्तुतिः

(चूलिकापैशाच्याम्)

वसन्ततिलकावृत्तम्

नाकाथिराचथरनिंतविसालचित्त-
फूमिप्परूठवरफत्तिलतानिकुंचे ।
काहीग्र नो चलनपत्थमनोमरालो,
यस्साफिलासमपि, सो विचयाय पासो ॥१॥
तारित्ततावपरितट्ठसरीरलोकं ।
संपूरितासथनवुट्ठिविफिन्नतापं ।
संपातितून समथम्मसमातरा ये,
तिश्ख फचन्ति सिवता मम ते चिनिता ॥२॥
सुत्थोतनस्स तनयस्स मतं न रम्मं,
एकंतनासविसयो न हु वत्थु लोके ।
एकंतथुव्वविसयोपि न साधुवातो,
तम्हा नमामि सियवातमतं चिनानं ॥३॥
हुंकारनातपरिफापितटुट्ठतेवो,
हत्थत्थसप्पपरितासितविरकमूसो ।
पासप्पसाततरुलत्थसतानिवासो,
सुरकाय भोतु सततं मम पासयरको ॥४॥

(इति श्रीपार्श्वजिनस्तुतिः)

श्री वर्धमानजिनस्तुतिः

(अपभ्रंशभाषायाम्)

पञ्चचामरवृत्ताम्

कसोवले ग्रभव्वसंगमस्स् भाविसामले,
सुपत्तु जस्सु धीरदासुवण्णु जाउ उज्जलु ।
सुरिंदचक्कवाग़वासराहिणाधु सो जिणु,
सभत्तिहं मणुस्सहं सुहाय णादनंदणु ॥१॥
सकम्मरोमहिं पपीलिया पवड्ढवेयणा,
मलीणवासणागुला अपत्थसेवणायरा ।

कहं नु हुंत माणवा न हुंत भूतले जइ,
परोवगारलद्धजम्मधम्मविज्जगा जिणा ॥२॥
विमुत्तिमग्गदंसणग्गबारु विग्घवज्जिउ,
दुरन्तदुग्गदिप्पवेसरोहलोहअग्गलु ।
जयप्पयासु सामि जोगखेमकारगुत्तमु
करेउ नट्ठदुक्खजालु सो मइं जिणागमु ॥३॥
सुवण्णवण्णदेहकन्तिभारभासिअंबरा,
पकामकामियत्थसत्थदाणि अप्पतारणो ।
जिणस्सु वीरहो सुभत्तिसत्तितत्तिवज्जिआ,
सिरिद्ध सिद्धदेवि देउ भव्वहं सुमंगलु ॥४॥
(इति श्रीवीरजिनस्तुतिः)

श्री दीपमालास्तुतिः

शिखरिणीवृत्तम्

गतो भावोद्योतः परमविमलज्योतिरधुना,
ततो द्रव्योद्योतं भुवि वितनुमस्तस्य विरहे ।
इति प्राज्ञैरष्टादशभिरवनीजानिभिरहो !,
कृता दीपालीयं जगति जयदा वीरजपतः ॥१॥
न मे कामैरर्थः परमसुलभैरर्थनिकरैः,
कृतं राज्येनाऽलं सृतममरलोकर्द्धिविभवैः ।
अनाप्तां संसारभ्रमणमतिभिर्मानवगणै-
र्लभेयं दुष्प्रापां जिनपपदपद्मेषु वसतिम् ॥२॥
श्रुते श्रोत्रानन्दः परममनुभूतेऽघविलयो,
मनः शुद्धिर्ध्याते विमलवचनो यत्र पठिते ।
भवेत्सेवायोग्यो विहितवरसेवे च मनुज-
स्तमानन्दोद्बोधं जिनपतिकृतान्तं प्रणमत ॥३॥
धृतश्रद्धा संघे विहितविनया वीरविभवे,
भवे सौख्यं दात्री जिनवरवचोबद्धमनसाम् ।
परा सम्यग्दृष्टः सुमतिजनसंतापशमनी,
सदा सिद्धादेवी भवतु भविनां दुःखदमनी ॥४॥

(इति श्रीदीपालिस्तुतिः)

श्री चिन्तामणिकल्प

नत्वा प्रणतनागेन्द्रं, पार्श्वनाथं जिनेश्वरम् ।
चिंतामणिसुमन्त्रस्य, वक्ष्ये कल्पं समासतः ॥१॥

चिंतामणर्मूलमन्त्रः कामधुक्कल्पपादयः ।
मन्त्रराजः सर्वकर्म्मा, निधिः कामघटोऽपि च ॥२॥

एतानि तस्य नामानि, मन्त्रशास्त्रपरायणैः ।
प्रथितानि प्रयत्नेन, ज्ञातव्यानि गुरोर्मुखात् ॥३॥

यस्य तस्य न दातव्यो, मन्त्रोऽयं गुरुणापि हि ।
यतः कुपात्रदानेन, दोषाः स्युरुभयोरपि ॥४॥

कुलीनं धार्मिकं भक्तं पूजाकर्म्मरतं तथा ।
धनिनं दानशीलञ्च, गुरोर्वचनतत्परम् ॥५॥

ईदृशं साधकं ज्ञात्वा, मूलमन्त्रं प्रकाशयेत् ।
विधाय विधिवत् पूजां दीपोत्सवादिपर्वणि ॥६॥

लब्धे मन्त्रे ततो धीमान्, श्रीमत्पार्श्वजिनप्रभोः ।
विधायाष्टाह्निकां पूजां गुरोर्वस्त्रैश्च पूजनम् ॥७॥

सौवर्णे राजते पात्रे, ताम्रपात्रे मितांवरे ।
कर्पूररोचना वर्णैः-लिखेद्यन्त्रं प्रयत्नतः ॥८॥

गुरुप्रतिष्ठिते यन्त्रे, पूजां कर्तुं समुद्यते ।
शिष्ये पवित्रगात्रे तु, धौताम्बरावृते मुखे ॥९॥

शुचिस्थाने न्यसेद्यन्त्रं; देवालये सुनिश्चलम् ।
पूर्वोत्तरमुखो भूत्वा, श्रीपर्णीपट्टके स्थितः ॥१०॥

आत्मरक्षां विधायोच्चै-र्भूमिशुद्धिं विकल्प्य च ।
हंसपूजां ततः कृत्वा, पुष्पं शिरसि धारयेत् ॥११॥

इडायां वहमानायां ततः पूजां समारभेत् ।

वीरासनोपविष्टेन पूजा कार्या सुधीमता ।
वामेतरकरांगुष्ठपवित्रांगुलियोजनात् ।१३॥

शतपत्रैर्जातिपुष्पै-र्बकुलैश्चंपकैस्तथा ।
कर्पूरागुरुसन्मिश्रैः, पूजाकार्या विवेकिना ॥१४॥

अथातः संप्रवक्ष्यामि, यन्त्रोद्धारं सुशोभनम् ।
येन विज्ञातमात्रेण, फलसिद्धिः प्रजायते ॥१५॥

मध्यभागे प्रभोर्बिम्बं फणामण्डपराजितम् ।
पार्श्वयक्षो यक्षिणी च, दक्षिणेतरभागयोः ॥१६॥

प्रणवाद्यं प्रभोर्नाम ह्रीं नमः इति संयुतम् ।
फणाचक्रोपरिन्यसेत् प्रथमं वलयं मतम् ॥१७॥

चतुर्दलं द्वितीयं तु वामादेवीति नामकम् ।
आह्वाननाख्यमन्त्रोय तृतीयकं चतुर्द्दलम ॥१८॥

प्रणवाद्यं चतुर्थ्यंतं, समाप्तौ ह्रीं नम इति ।
ब्रह्मधरणनागाश्च पद्मावत्यपि नामतः ॥१९॥

षोडशार्द्धं दलं तुर्यं, मूलमन्त्रसमन्वितम् ।
अ आ आदौ अं अः अन्ते दले दले स्वरद्वयम् ॥२०॥

पंचमे वलके पञ्च पदानि परमेष्ठिनाम ।
ॐ नमो ह्रीं नम इति, पद्याद्यन्ते ज्ञानादि च ॥२१॥

षष्ठे षोडशनामानि देवीनां प्रणवैः सह ।
ह्रीं नमोन्त प्रविष्ठानि, रोहिण्यादि दले दले ॥२२॥

प्रणवो मरुदेव्यादि, सप्तमे जिनमातरः ।
चतुर्थ्यन्तपदैर्युक्ताः, पत्रे पत्रे तु ह्रीं नमः ॥२३॥

अष्टमे वलके चाष्टौ, द्विगुणा निग्रहैः सह ।
विजयाद्ये कांतरिताः, प्रणवो ह्रीं नमस्तथा ॥२४॥

नवमे वलके चाष्टा-विन्द्राद्या प्रणवैः सह ।
ह्रीं नमश्चात्र सर्वत्र, चतुर्थ्येक वचः पुनः ॥२५॥

मायाबीजेन संवेष्टय, प्रणवेन तथोपरि ।
अङ्कुशश्चापि रेखान्ते, विद्यामन्त्रेण, वेष्टयेत् ॥२६॥

पृथ्वीमण्डलमध्यस्थं लक्ष्यक्षरत्रिशूलयुक् ।
कल्पद्रुमसमायुक्तं, गुरुपादुकयान्वितम् ॥२७॥

यन्त्रोद्धारः समासेन, विवृतो मन्दमेधसा ।
जापध्यान क्रमं वच्मि, विधिवग्दुरुणोदितम् ॥२८॥

अर्वाचीनं फलं ज्ञेयं, वश्यं स्तम्भनमोहने ।
विद्वेषोच्चाटकर्म्माणि, मनसापि न चिंतयेत् ॥२९॥
शान्तिकं पौष्टिकं वापि, धर्म्म-ध्यान-विवर्द्धकम् ।
इहलोकार्थकृन्नित्यं, सङ्घ कार्ये विशेषतः ॥३०॥

कर जापो द्विधा ज्ञेयः सृष्टि–सहाररूपतः ।
नंद्यावर्त्तः शुभे कार्ये, शंखावर्तस्त्वमङ्गले ॥३१॥
अथालम्बनहेतुत्वात् शुद्धस्फटिकमालया ।
कुर्याज्जाप प्रयत्नेन, कर्म्मक्षयनिबंधनम् ॥३२॥
अक्षतैः कुसुमैश्चापि, जापः कार्यो निरन्तरम् ।
मूलमन्त्रस्य यत्नेन, परलोकविधित्सया ॥३३॥

ध्यानकाले प्रथमत-श्चन्द्रकान्तसमप्रभम् ।
पार्श्वनाथप्रभोर्बिम्बं, संस्थाप्यं प्रविचिन्तयेत् ॥३४॥

आत्मनश्च प्रभोश्चापि, नान्तरं चिंतयेद्बुधः ।
दुग्धधाराप्रवाहैश्च विद्यमानं विचिन्तयेत् ॥३५॥
मूलमन्त्रस्य बीजानि षट्स्थानेषु नियोजयेत् ।
शिरोंस वक्षः करयो, सृष्टिमार्गेण धीधनैः ॥३६॥
नादबिन्दुकलाभ्यासाज्ज्योतिरुत्पद्यते पुनः ।
तत्प्राप्तौ च मनुष्याणां, जायते परमं पदम् ॥३७॥
परमेष्ठिमुद्रयाथ, सौभाग्यमुद्रयाऽथवा ।
ध्यायेत्परमबीजानि, साधकः सुसमाहितः ॥३८॥

दशत्रिंशद्विसहितैर्लक्षयाऽथवा ।
जपेद्यः परमं मन्त्रं, स प्राप्नोति शिवालयम् ॥३९॥
विद्यासौभाग्यमारोग्य, पुत्रप्राप्तिविभूतयः ।
कल्याणं सफलं विद्धि, कणाब्रे च कुटुम्बिनः ॥४०॥
विधाय सकलां पूजां, प्रभोश्चिन्तामणेरपि ।
ढौकयित्वाथ नैवेद्यं, जलताम्बूलसंयुतम् ॥४१॥
ततः कर्पूरफालोभिर्घण्टानादपुरस्सरम् ।
आरात्रिकं विधायोच्चैर्मङ्गलं च प्रभोः पुरः ॥४२॥
लवणाञ्चलमुच्चार्य, स्तुयात्स्तोत्रैः सदण्डकैः ।
पञ्चाङ्गप्रणतिं कृत्वा, योजयेत्करसंपुटम् ॥४३॥

माता पिता जगत्त्राता भ्राता स्वामो त्वमेव मे ।
त्वमेव जीवितं नाथ, भूयाज्जन्मनि जन्मनि ॥४४॥
श्रोमानतुङ्गशिष्येण, धर्म्मघोषेण सूरिणा ।
रचितोऽनलकल्पोऽयं, चिन्तामणि जगत्प्रभोः ॥४५॥
(इति श्री चिन्तामणिमन्त्रराजकल्पः)

अधुना चिन्तामणि संप्रदायः

ॐ ह्रीं श्रीं अर्हं नमिऊणपासविसहर व सहजिण फुलिंग ह्रीं नमः एष मूलमन्त्रः । चिन्तामणि चक्रं वहिका पट्टे कुंकुम गोरोचना कस्तूरिका कर्पू रादिभिः सुगन्धद्रव्यैः पूर्वं लिखित पट संदर्शन श्री पार्श्व-नाथस्य जन्म कल्याणक दिने जन्मनक्षत्रे च सूरिणा शिष्येण च कृत-स्नात्रेण ब्रह्मचर्योपवासरतेन च सदश वस्त्रावरणेन साधिष्टायक श्री पार्श्वनाथ प्रतिमाकृत पञ्चामृत स्नात्रपूजोपचारेण तदग्रे बलिधूप नैवेद्यपूजापूर्वं एष मन्त्रः प्रदातव्यः अस्य करजापे लक्षमेकं कार्यं पुष्प जापेश्वेत जातिपुष्प २४००० ततः सदा सिद्धिः सर्व कर्म्मकरः ।

अष्टदल पद्मकोशे, श्रीपार्श्वजिनेश्वरं न्यस्य नागेन्द्र विधृत छत्रं प्रियंगुपत्रावदाताङ्गं ॥१॥

विजयाजयस्त चमर वैरोटया वन्दितं विगतमोहम् ।
सप्रातिहार्यकलितं देवो पद्मावती पूज्यम् ॥२॥
श्रीपार्श्वयक्ष :सकलत्रसंस्तुतं चाष्टनागकुलकलितम् ।
विद्यादेवी षोडश परिकरितं ध्याययेद्देव ॥३॥
प्रणवं न्यस्य ललाटे जिनस्य गोक्षीर चन्द्रकर तुल्यम् ।
मायाबीजं हृदये ध्येयं तरुणार्क बिम्बनिभ ।४॥
हरिकान्ताया बीजं काञ्चनवर्णं निधाय पदकमले ।
अर्हमितिदेवबीज ध्येयं शिष्यैर्गु रोर्वचसा ॥५॥
शान्तिक पौष्टिक हेतोः श्वेतं ध्यायेच्छशाङ्ककरकल्य ।
पीतं स्तम्भादिविधौ वश्या कृष्टौ तथा रक्तं ॥६॥
धूम्राभमथोच्चाटे कृष्णाभं मारणं विनिर्दिष्टम् ।
मोक्षार्थं व्योमाभं ध्येयं श्री पार्श्वनाथ जिनं ॥७॥
यो योगी श्रावकः साधुः शुक्लध्यानपरायणः ।
ध्यायति श्रीजिनं देवं वामेयं भुजगावृत्तं ॥८॥
भूतप्रेतपिशाचाद्यो, नालंभूष्णुस्तदग्रतः ।
नित्यावेला कृतो रात्रि तथैकांतर द्वयन्तरः ॥९॥

त्रिचतुर्थपक्षमास, षण्मास व्यन्तरादिका ।
ज्वराः सर्वेऽपि नश्यन्ति वातपित्त कफोद्भवाः ॥१०॥
डाकिनी शाकिनी चण्डी, याकिनी योगिनी तथा ।
लाकिनी नाकिनी सिद्धाः सप्तधा शाकिनी स्मृताः ॥११॥
एतेषां खलु ये दोषा, स्तेसर्वे यान्ति दूरतः ।
चिन्तामणि सुचक्रस्थ, पार्श्वनाथ प्रसादतः ॥१२॥
बिलिख्य काञ्चनस्थाले, श्रीखण्डेन घनेन च ।
चिन्तामणि महच्चक्रं दर्भमूलेन योगिना ॥१३॥
लिखनीयमिदं चक्रं, गधधूपादि पूजितम् ।
जातिपुष्प सहस्रेण, मूलमन्त्रेण पूजितम् ॥१४॥
प्रक्षाल्याथ च दुग्धेन वारिणा वा प्रयत्नतः ।
ज्वरदोषादिभिर्ग्रस्तं पात्रं पातव्यमेव हि ॥१५॥
एवं सप्तदिनान्याशु, पुष्पजापपुरस्सरम् ।
पीतं हि रोगदोषादीन्विनाशयति निश्चितम् ॥१६॥
कार्म्मणं याति दूरेण यन्मध्याक्षेतचित्कृतम् ।
यन्त्रपान प्रयोगेन देहिनां नात्र संशयः ॥१७॥
रक्तकण वीरपुष्पै द्वादश सङ्ख्यैः सहस्र सज्जप्तम् ।
वश्याकर्षण कार्यं, करोति मन्त्राधिराजोयम् ॥१८॥
स्तम्भयति शत्रुवाचां, पीतध्यानेन पीतपुष्पोघैः ।
इति स्तम्भं करोति, विधिना वर वालुकां जप्त्वा ॥१६॥
अनवच्छिन्ना रेखा देया क्षेत्रेषु मूलमन्त्रेण ।
नाशयति शलभवृन्दं, गुरूपदेशेन सज्जप्तम् ॥२०॥
श्मशान कर्पटे खलु श्मशानाङ्गारराजिका च विषैः ।
धतूरकरस लिखितं, परिजप्तं काहली पुष्पैः ॥२१॥
उच्चाटयति महेश्वर ध्वजा निबध्धं समस्त शत्रुगणं ।
मारयति चिताङ्गारैः परिजप्तं नास्ति संदेहः ॥२२॥
इति संक्षेपेण मया कथितं चिन्तामणेः फलं सारम् ।
विस्तरतो विज्ञेयं वृहदुद्धारान्महामतिभिः ॥२३॥

आकृष्टि१ वश्य२ बध३ रोध४ विबोध५ शांति६ विद्वेषणो६ षुसृणि१ रंकुश२ वज्र३ शंख४ बोध५ प्रवास६ सहिताः षडमूर्हिमुद्रां विद्रावणया दुरितस्य सदा विदध्यात् ॥१०॥ (इतिमुद्राः)

दृषत्प्रवालाम्बुजहेमपुत्रं जीवत्स्रजोऽगुष्ट मुखांगुलीभिः।
मोक्षे१ ऽभिचारे२ शमने३ वशे४ च ग्राकर्षणे कर्म्मणि५ चालयेद्धि॥११।

मोक्षेऽगुष्ठेन, अभिचारकर्म्मणि तर्जन्या, शान्तिकेमध्यमिकया, वश्येऽनामिकया ग्राकर्षणे कनिष्ठिकया।

स्फटिक१ प्रवाल२ मुक्ताफल३ मयहेममयः४।

पत्रजीवक५ सूग्मणयः क्रमेण चाल्यन्ते ॥१२॥ (इतिसृजः)

स्तम्भ१ द्वेषा२ कर्षण३ पोषण४ शान्त्या५ प्ति६ वश्य७ मृतिकर्म्म८ ॥
पूर्वादिक दिग्वदनः सुधिर्विदध्यात् सदाकार्यम् ॥१३॥ (इतिदिशः)

उच्चाटनद्वेषणमारणानि चन्डद्यु तौवायुखतेजसिस्थे ।।
शांति सपुष्टि वशतां विबोधं चन्द्रेजसोर्व्वीप्रवहे विदध्यात् ॥१४॥
(इति तत्त्वानि)

काकोलूक कपोतकं कतगरुत्प्रेतालयास्थंशुक,-
क्षाराङ्गारकपालवासमहिषोष्ट्रश्चौतुवासेयजाः
दन्तास्थासृजवर्म्मकेशविचया भद्रा च रिक्तातिथि,-
मंन्देशार्कयमाग्निभं च मृतिकृद्योगादिरुच्चाटने ॥१५॥

मध्यापराह्णस्तमयं हराग्नि रक्षोयमाशा हरितालराज्यः।
निम्ब्रार्कपत्राणिचधूसकेश निर्मास्यधूलीतिसतैलमाषाः ॥१६।

मषी च धत्तूरक पुष्प चूतद्रु शाल्मली पिप्पलकीलकाद्याः॥
एनानि बीजानि भणन्ति विज्ञा विद्वेषणोच्चाटनमारणेषु ॥१७॥

कर्पूरचन्दन सुकुंकुमगन्धधूली प्रातर्निषार्धरविपुष्यभमूलयोगात्॥
श्वेतां शुक दधिमधुप्रभृति प्रकामं शान्त्यादिकर्मणि करोति बुधोऽर्थसिद्धयै ॥१८॥
(इतिद्रव्य संचयः)

उदयार्क्करक्तशशधरधूमहरिद्राऽसिता वर्णाः॥
आकृष्टिवश्यशान्तिक विद्वेषणरोधवधसमये ॥१९॥ (इतिवर्णाः)

विद्वेषणाकर्षणचासनेषु हूं वौषडन्तं स्फुडितिप्रयोज्यम् ॥
वश्ये वषट् वैरिवधे तथा यः स्वाहास्वधाशान्तिकपौष्टिकेषु ॥२०॥
(इतिरिञ्जका)

षट्कर्म्माण्यहमधुना विधिना वक्ष्ये परात्मबोधाय ।
मन्त्राधिराजसत्कान्यवबुध्य च विमलकमलेभ्यः ॥२१॥
प्रातः पवित्रवसनो दीपनयोगेन पङ्कजासनकृत् ।
पूर्वाभिमुखः शुक्लध्यानयुतो बोधसंयुक्तः ॥२२॥
हिमरुचिमण्डलससङ्गतहसो विस्फूर्जदवनिजसतत्त्वः ।
शरदि प्रसन्नवदनो ह्यंगुष्ठेन प्रचालयेन्मालाम् ॥२३॥
कुंकुमचन्दनचन्द्रैः सुवर्णकुशलेखिनीभिरभिलिखितम् ।
यन्त्रं पवित्रपात्रेऽष्टखखेन्दुसुमैर्जप्तम् ॥२४॥
पूर्वोक्तं योऽर्चयति च नित्यं शान्तिं करोति वामेयः ।
तस्य गृहे दुरितालो शाम्यति शरदीव घनमाला ॥२५॥
शमयतिदुरितश्रेणिं दमयत्यरिसंततिं सततमस्य ।
पुष्णाति भाग्य निचयं मुष्णाति व्याधि सम्बाधाम् ॥२६॥

(इति शान्तिकयन्त्रम्)

दीपनः—

ह्रा मलिके ए स्कन्धे हां स्कन्धे फुर्भुजे तु कुक्षावों ।
ह्रूं कटीतटगत टो जानुनि जामपादे ॐ ॥२७॥
क्षो नांभौ स्वा सिङ्गे ए पादे दक्षिणे च फुर्जानुनि ।
ह्रीं कटीगः कुक्षौ ह्रीं टः कर मः कुचयुगे योक्षः ॥२८॥

(ह्रीं शिरसि)

यन्त्रमिदं पल्लवकृत् प्रवालमुद्रोऽथ कुक्कुटासनकृत् ।
वायव्यकोण वदनो मध्याह्ने हुत्विति प्रयुञ्जानः ॥२९॥
प्रावृट्कालेश्वसने निगमद्युतिनाडिकां समाश्रयति ।
निश्चलचेताः पवनगतत्त्वोऽसौतर्जनीजापः ॥३०॥
घनसार घुसृणधूसक सुगन्ध धूलीभिरभिलिख्य ।
कनकतरोः लेखिन्या पत्रे जाती सुमैर्मषीमिश्रैः ॥३१॥
अष्टख विधु १०८ प्रमाणैर्जपति नरो यो निशं विशङ्कासन् ।
तदरिकुलं विद्वेषं मिथः प्रयातीह वामेयात् ॥३२॥
नार्यानरेण साकं नार्या साकं नरस्य विद्वेषम् ।
कुरुते कृष्णाशयतो ध्यातो वामासुतः सततम् ॥३३॥

शत्रूयति मित्रततिः सर्पति जनकः सपत्नति सवित्री।
रक्षस्यति दयितापिहि साधक शत्रोर्जिनप्रभावाच्च ॥३४॥
(इतिविद्वेषयन्त्रम्)

पल्लव—

भाले ह्रीं मे स्कन्धे ए स्कन्धे टो भुजे च कुक्षा वों।
ह्लः कटिगो जानुनि फुः पादे ॐ नाभिगो ह्रीं च ॥३५॥
टोलिङ्गे चरणे ह्राँ ह्राः कट्यां जानुनि स्वा तथैवः।
मायाकुक्षौ हस्ते हा कुचयोर्यस्तथा ह्रिक्षः ॥३६॥
फुः शिरसि सम्पुट योग विधायी सरोजमुद्रा विचक्षणो मन्त्री।
रक्ताशयो वषट् कृत् पूर्व्वाभिमुखस्त्विदं यन्त्रम् ।३७॥
उदयति हिमरुचिविलसति सलिलधरा मण्डले ह्यनामिकया।
जपमालां संचाल्य प्रफुल्लहृदयं च साधकं ध्यायन् ॥३८॥
कर्प्पूरगंधधूली कुङ्कमगोरोचनादिभिर्विमलद्रव्यैः।
अभिलिख्य कांस्यपात्रे रक्तैः कुसुमैर्वसुख, चन्द्रैः ॥३९॥
पूर्व्वाह्ले पूजयति च रक्ताशययुग् जिनेश्वरं भक्त्या।
तस्यावश्यं वश्यं प्रयात्परं विष्टप त्रितयम् ॥४०॥
नरनरपतियुवतितति दुर्ज्जनधी धन जिघांसु जनतापि।
अपदद्विपदचतुष्पदममुष्य सर्व्वं हि वश्यं स्यात् ।४१॥
(इति वश्य यन्त्रम्)

सम्मपुटः—

भाले ॐ स्कन्धे ॐ मंसे प स्वान्तरे च टो भुजगः।
फुः कुक्षौ टो जानुनी फुः पादेनाभिगोऽस्य भवति क्षः ॥४२॥
स्वालिङ्गे पदयोर्यौ ह्लूँ जानौ कुक्षिगो भवेद्धि ह्लः।
माया भुजेन्तरे ह्राँ ह्रीं कुचे हा तु चे पुनर्विद्धि ॥४३॥
ऐ शिरसि रोधक योगे निपुणो हरहरिदुक्षिप्त रुद्रनयनयुगः।
अपराह्णे वज्रासन विहितास्थः शंखमुद्रया कलितः ॥४४॥
चण्डद्युतावुदयति ज्वलने तत्त्वे समुद्यतोनतराम्।
मध्यमया कृत जापः साध्यंपीतप्रभममवनीतलमभितः
पश्यन् हरिद्रयायुतया ॥४५॥ कुङ्कमगोरोचनग्रालि०।
पीतैः कुसुमैरष्टस खेन्दु १००८ मितै रर्चयत्यनिशम्।
यन्त्रमिदं यो योगीतस्यारीन् स्तंभयेत् सजिनः ॥४६॥

कालसिरीसृपरसना प्रायान् दधतो हितान् करवालान् ।
सु.... .... स्तस्य ॥४७॥
गर्भव्याधिविबाधा दुर्ज्जनवादीन्द्र चौरदहनानाम् ।
निजपरचक्रजलाहि प्रभृतीनां स्तम्भन कुरुते ॥४८॥
(इति स्तम्भनयन्त्रम्)

रोधः--

ॐ भाले स्कन्धे ह्रीं मं सेक्षः पाणिगो भवेत्प्रणवः।
वक्षो यः फुः कुक्षौ फुर्जानुनि ह्रीं पदे हि स्वा ॥४९॥
ह्रांताता तौ लिङ्गे ह्रींहा पादे ह्रूँ भवेत्ताथा जानौ।
टः कुक्षौ फुः क्षा गतो भुजे ह्रां कुचेर ए ऐ ॥५०॥
यः शिरसि याम्यादिग् वदनोऽयं दण्डासन संस्थितो हि वौषट् कृत ।
अंकुश मुद्रा सहितोऽभ्युदितादित्योजसंजिनं ध्यायन् ॥५१॥
हेमन्ते हिम करण समुद्यते वायुमेदनीतत्त्वे ।
पूरक वात विधाता कनिष्टचाऽक्षसूत्रं स्पृशन् ॥५२॥
अरुणोदय वेलायामिदं लिखित्वा तु भूर्यपत्रादौ ।
वुसृणघनसारचन्दन ,गोपितैर्यैथ पूजयति ॥५३॥
आयान्ति संपदस्तं नदीनमिव दूरतः सदानद्यः ।
त्यजति नतं नहि सिद्धिर्वशीकृतामत्तनेत्रेव ॥५४॥
कनकगिराविवकनकं मणिरिवजलधौ निधाविवधनं च ।
रत्नमिवरोहणगिरौ तस्य गृहं चाक्षयं भवति ॥५५॥
(इति साभयन्त्र)

क्रोमलिके ह्रीं मंसे, ए भुजेन्तरेहि ह्रः ।
फुःक व्रांस्वा जानुनि, क्रों पादेनाभिगोयाहि ॥५६॥
ए लिंगे टः पादे हा जानुनि ह्र ू कटीतटगकक्षायाम् ।
क्षः करगः फुः कुचगावश्य चोंकारौ ॥५७॥

ट् शिरसि--

कज्जल मलिनं भुवनं घनाघनश्यामलं जिनं पश्यन् ।
ज्वलनदिशि विहितवदनः सायं वज्रासनस्ततो मंत्री ॥५८॥
शशिरे सवितरिवहति ज्वलनं तत्त्वं च कुंभकविधायी ।
मध्यमयारिं नागैर्जपयुक् संनद्धमभिपश्यन् ॥५९॥

योगविदर्भणवेत्ता यन्त्रमिदं मृतक कर्प्पटे लिखति।
कुंकुमकोकिल रक्तै र्हरिद्रयामिश्रितैस्तु शिति कुसुमैः ॥६०॥
पूजयति पार्श्वनाथं प्रसादतस्तस्य सुमहदरि निवहः।
क्षयति स्वयं निशापतिरिवकृष्णं पक्षमिवलब्ध्वा ॥६१॥
अभिजातिजातिरस्य क्षयतिहकमले च हीनपुण्यस्य।
रोगैर्द्रव्यविनाशैरशुभैर्दुरितैश्चनृपरिपुभिः ॥६२॥

(इतिमारणयन्त्रः)

विदर्भणः—

भाले ह्रीं ए ऐः स्कन्धयोः फुः करे टोंऽतरे हि फुः।
कट्यां स्वा जानुन्यो ह्रीं पदे ह्रों नाभिगस्तस्य ॥६३॥
लिङ्गे ह्रीं पदगो ह्रूं ॐ जानुनि हा कटावन्तरे टो हि।
टः पाणावथकुचयो र्यः क्षः शिरसि माया ॥६४॥
इत्थं शशिधर सदृशौ भुवनजिनौ बोधमुद्रया पश्यन्।
भद्रासन आसीनो घनसारैर्यन्त्रमभिलिख्य ॥६ ॥
जाती कुसुमैरर्हति शश्वत्स्फुटिकाक्ष मालया जपति।
एकाग्रमानसोऽतनिशि घटिका चतुष्टये मन्त्री ॥६६॥
सकविर्दैवसोऽपि हि वादीन्द्रोमन्त्रयन्त्र निपुणश्च।
सर्वकलाकुलसदनं भवति नरोऽवश्यमेवात्र। ६७।

(इति ज्ञानयन्त्रम्)

ह्रीमलिके ॐ स्कन्धे ह्रा मंसे ह्रीं भुजेन्तरे हि ह्रूं।
टः कट्यां जानुनि ह्रीं पादे फुः नाभिगो भवद्धि ह्रः ॥६८॥
टो लिङ्गे स्वा पादे हा पादे यः कटीतटगतोऽपि।
ए ऐ कक्षा करगौक्षः फुः कुचयोः शिरसि च प्रणवः ॥६९॥
इत्थं ग्रथनाऽभिज्ञः स्वस्तिक संस्थश्च शंखमुद्राकृत्।
पीतध्यानविधिज्ञः शब्दं फुडिति प्रयुञ्जानः ॥७०॥
यन्त्रं विलिख्य कोकिल रक्तैर्हरिद्रयायुक्तैः।
अष्ट ख ख चन्द्र १००८ कुसुमैः कृष्णैरर्चयति मध्याह्ने ॥७१॥
ग्रामं नगरं जनपदमरातिमवनीपतिं जनं त्वरितम्।
क्षोभयतिपार्श्वनाथः सन्ततमित्याग्रह ध्यातः ॥७२॥

(इति क्षोभयन्त्रम्)

अथनाभिज्ञः—

अंकस्थानेषु मंत्रवर्णाः कर्मसु लेखनीयाः।

दिक्कालमुद्रासनतत्त्ववर्णप्रभञ्जनादीनथ योगषट्कम्।
विज्ञाय कल्पाद्रजतादि पट्टे संलिख्य कर्माणि बुधो विदध्यात् ॥७३॥

अथ प्रस्तावाद्ध्यान विशेषं वच्मि--
जानुयुग्ममभिहेमसमानं रोहिणीरमणभङ्क्त्वभिनाभि।
कण्ठमानवदिवाकर कान्ति कज्जलाभमभिमौलिसरोजम् ॥७४॥

वैनतेयमिवपार्श्वजिनेशं व्याधिविघ्नतिमिरौघदिनेशम्।
जङ्गमस्थिरगरोत्करनाशे मानसे स्मरत हर्षविकाशे ॥७५॥

उक्तमपरेणः—

युक्तं कमठपद्माभ्यां धरणेन्द्रेणपद्मया।
जयाविजयादेवीभ्यां सप्तफणाजर""धं ॥७६॥
श्वेतं पार्श्वं जिनास्याच्च निर्गत्य प्रविशत् श्रियम्।
मुखे ध्यायति यस्तस्य शान्तियुग्लाभुष्टयः ॥७७॥ (युग्मम्)
नवपाणिर्नवफणैररुणाभं सुधां क्षरन्।
पार्श्वस्वाम्यरिचौरास्ये ध्यातः संमोहवश्यकृत् ॥७८॥

अध्यष्टकोटिफणाभिर्भरन्तममृतं जिनं।
स्वाङ्गे ध्यायति यस्तस्य दिव्यस्तम्भो भवेदिह ॥७९॥

अध्यष्ट कोटिफणाभिर्विषाढ्यैः करर्कोजिनः
वर्षन्निगडबन्धेषु ध्येयस्तद्भंगहेतवे ॥८०॥

नवलक्षफणाग्रैस्तु श्यामः पार्श्वो विषं भरन्।
ध्येयः शत्रुशरीरस्य द्वेषोच्चाटनमारिकृत् ॥८१॥

ध्यातव्यः पथिगच्छद्भिर्नवलक्षफणाग्रतः।
विषं वर्षन्जिनश्चौरभूताद्यास्येषु बन्धकृत् ॥८२॥

मन्त्राधिराजषट्कोण यन्त्रध्यानविधिर्मया।
पारम्पर्यादयं ज्ञात्वानुभवात्प्रकटीकृतः ॥८३॥

दक्षिणेतरवज्रान्त मध्याग्निः सरन्नथसरीसृपराजः।
उत्क्रमेण सकलानपिवर्णा नाश्लिषन्निजजनाभिबन्धुः ॥८४॥

स्वर्णं सोदरसहस्रफणाभिरातपत्रमतुलं तु दधानः ।
योगिभिर्जिनवरस्मृतिकाले सन्ततं मनसि संस्मरणीयः ।८५।

उत्ताप्तकनकमरकतविद्रुम घनचन्द्रबिम्ब सच्छायम् ।
मायावर्णंग्याजाद्यदातपत्रं विभोरुपरि ।।८६।।

तद्विभया निजदेहं छादितमभितोऽपि सन्ततं ध्यायेत् ।
यः पार्श्वनाथजिनवरपदपङ्कजमधुकरो हि नरः ।।८७।।

सप्तविधा डाकिन्यः संदस्यवो हस्तिनोऽग्नयः सिंहाः ।
अरयः किरयोभूमीपतयो रक्षोऽधिपतयश्च ।।८८।।

भूतप्रेतपिशाचग्रहमुद्गल खेचराः सवेतालाः ।
फणिनोदुर्जननिवहास्तमभिद्रोतुं न शक्ताः स्युः ।।८९।।

(इति छत्रप्रभावः)

मन्त्राधिराजजिनपतिचरणाम्बुजसेवना सततमेव ।
ज्वरवातसन्निपातश्लेष्माद्याः शममयन्ति गदाः ।।९०।।

शाकिन्यो यक्षिण्यः कूष्माण्डिन्यो जलनिवासिन्यः ।
वनवासिन्योऽथ नभोगामिन्योऽरण्यचारिण्यः ।।९१।।

रेवत्यः क्षेत्रभवा ग्रामभवाः शैलभवाश्चापि ।
सप्ताक्षतकणनिकराज्झटिती विमुंचन्ति देवता एताः ।।९२।।

नित्य ध्यान विधानाद्विधिना सिध्यन्ति सिद्धयोऽष्टौ हि ।
दहनसमीरणसलिलस्तम्भनमपि चिन्तितः कुरुते ।।९३।।

दौर्भाग्योपहतानां सौभाग्यं रोगीनामथारोग्यम् ।
वन्ध्यानां सन्ततिमपि मृतवत्सानां सजोवसन्ततिताम् ।।९४।।

विजयार्थिनां तु विजयं धनार्थिनामिह महद्विभवम् ।
जायार्थिनान्तु जायां नियोगिनां निजपद नियोगम् ।।९५।।

निजदेशभ्रष्टानां भूमिपतीनां स्वभूमि लाभञ्च ।
विद्यार्थिनां च विद्या बहुपुत्रान् पुत्रकामानाम् ।।९६।।

अपद द्विपद चतुष्पद जनपद वशतां वशार्थिनां सततम् ।
अभिजातिजने निधनं स्तम्भनमथ मोहनं सुमहत् ।।९७।।

ऋद्धिं बुद्धिं सिद्धिं गतिं धृतिं संस्मृतिं जने प्रीतिम् ।
कीर्त्ति स्फूर्त्तिमनार्त्तिं दत्ते वामासूतो ध्यानः ।।९८।।

कुलकम् ।।

मन्त्राधिराजजिनराज तवप्रसादा-
दासादयन्ति यदिहाभि-मतानिभव्याः ॥
चित्रं किमत्र सुरमानवसर्पनाथ संप्रार्थितं निजपदं हि यतो ददासि ।९९।

वामेय ! वाक्पति मति प्रकरोर्जितोऽपि-
को वक्तुमत्र भवतोऽतिशयान्प्रगल्भः ।
यस्य प्रभावलवतोऽप्यचिरान्प्रसूते
वन्ध्या तनूज-मभिपश्यति दृष्टिहीनः ॥१००॥

त्वद्ध्यान सन्धान सुधानिपानपीना न दीनाननतां भजन्ते ।
कीनाशसेनाभगदान्विजित्य मृत्युञ्जितो यान्ति शिवालयन्ते ॥१०१॥
सौभाग्यमारोग्यमवन्ध्यभाग्यम् श्रीकीर्त्तिविस्फूर्त्तिमनार्त्ति मन्तः ।
तन्नाममन्त्रस्मरणाल्लभन्ते सद्यः समुद्यद्वर भक्तिभाजः ॥१०२॥
त्वदङ्गसङ्गद्युति यामुनाम्भस्स्नानेपि गङ्गाजलवद्विशुद्धाः ।
चकासति त्वां समुपासते ये प्रभोः प्रभूणां महिमा गरीयान् ॥१०३॥
सेवालतावृत्फलशालिनीते सेवालतालस्यमयी न यस्य ।
तृणाति ते ध्यानसरो विशालं पिपासितां संसृति तापभेदि ॥१०४॥
संसार कान्तारचिरप्रचारनिवारणे कारणमामनन्ति ।
त्वामेकमेवेति नमामि तेऽह्री भवया भवभ्रान्तिनिवारको तु ॥१०५॥
श्रीवामेयगुणैरमेयमहिमा किं मादृशेनामुना ।
वाणीगोचरमत्र तत्र भवतस्त्वानीयते ते विभो ।
सर्वज्ञस्मरणस्तवार्चननति ध्यानप्रभावाद्यतो ।
मूको जल्पति संश्रृणोति बधिरः पङ्गुर्नरीनर्त्ति च ॥१०६॥
जम्बूद्वीपसरः सरोरुह समुल्लासायमानामरः ।
क्षोणीभृद्वरविष्टरं स्थिरतरं यत्तिष्ठते प्रष्ठमम् ॥
यस्तत्रास्ति भुजङ्गपुङ्गवफणा रत्नप्रभा भास्वरः ।
श्रीमत्पार्श्व जिनेश्वरः स्वरसतस्तस्य स्तुतिः प्रस्तुता ॥१०७॥

त्रिसन्ध्यं संधत्ते मनसि विशदां यः स्तुतिमिमा-
ममानध्यान श्री प्रणयपरिणिद्ध प्रणितिभिः ।
श्रीयोदेव्या वाचामपि च सममासाद्यविभुताम् ।
धुतान्तः कर्मौधः प्रणयति शिवश्री प्रणयिताम् ॥१०८॥

(इति स्तवनम्)

बद्ध्वावामभुजस्य तु मुष्टीकृत्वा तु तर्जनी वक्राम् ।
संदर्शयेदमुष्यतु मुद्रासावङ्कुशाख्येति ॥१०९॥ (इत्यंकुशमुद्रा)

युतमणिबन्धौपाणी सरलप्रसितांगुली""र्द्ध मुखौ ।
कुर्याद्यन्त्रस्याग्रे विधिविज्ञः पद्ममुद्रेति ॥११०॥ (इतिपद्ममुद्रा)

दक्षिणभुजेन वामा वामभुजेनापि दक्षिणायुगपत् ।
प्रसृतांगुलिना ग्राह्या कलाचिका वज्रमुद्रेति ॥१११॥ (इतिवज्रमुद्रा)

क्षिप्त्वांगुष्ठौ मध्ये मीलित सरलांगुलीत्रयो यत्र ।
वक्रिततर्जनिकावथ भुजौ विदध्यात्तु शंखमुद्रेति ॥११२॥
(इति शङ्खमुद्रा)

वज्र कनिष्टा नामा व्यस्तांगुष्टाययोर्यदिह भुजयोः ।
सरलतलेतर्जनिकामध्यमस्तकेभ्यः प्रवालमुद्रेति ॥११३॥
(इति प्रवालमुद्रा)

तिस्रोंगुलीस्तु सरलास्तर्जन्यंगुष्ठकौ च समिलितौ ।
कुर्याद्यत्रप्रवचन बोधाख्येति ज्ञानमुद्राख्या ॥११४॥
(इति ज्ञानमुद्रा)

किंनेष्टाभिरिहासनैं किमु तपो जापैस्तु किं सेवया ।
किं होमेन किमम्बरेण कुसुमैः किं किं सुभोगैरपि ।
एकं सुस्थिरमानसे तु विधृतं ब्रह्मव्रतं कारणम् ।
सिद्धिनामिहमन्त्रयन्त्रवियोमोघा यदेकं विना ॥११५॥

........वनिता शिरस्सु पदवी सीमन्तकस्य स्फुट,
.... मुखास्तुदुर्गतिपदे .... नृणिनेत्राण्यपि ।
.... भ्नुरुरगी च काल कुटिल ""क्षाध्वसंरोधकृत् ।
यद्देह मलगेहमेवमनसि ध्यात्वेति नारीं त्यज ॥१६॥

नोदाक्षिण्यवशान्नलोभवशतो नोवाभयात्स्नेहतो,
नोकस्मा श्रति विस्मयार्थ जनको मन्त्राधिराजः प्रभुः ।
देयः किन्तुपरीक्ष्य मास षट्कं सत्वं शुचित्वं मते,
गाम्भीर्यं च कुलादिकं तु गुरुभिः शिष्यस्य यत्नाद्भिति ॥१७॥

उपसर्गहरस्तोत्र-लघुवृत्तिः

आवश्यकादिनिर्युक्ति, - विधानाल्लब्धकीर्त्तये ।
भद्रबाहुमुनीन्द्राय, श्रुतकेवलिने नमः । १।।

उपसर्गहरस्तोत्रं, वराहविहितोपसर्गदलनाय ।
श्रीसंघशान्ति हेतु, ततान यस्तं गुरुं वन्दे ।।२।।

उवसग्गहरं पासं, पासं वंदामि कम्मघणमुक्कं ।
विसहरविसनिन्नासं, मंगलकल्लाणआवासं ।।१।।

विसहरफुलिंगमंतं, कंठे धारेइ जो सया मणुप्रो ।
तस्स गहरोगमारी, दुट्ठजरा जंति उवसामं ।।२।।

चिठ्ठउ दूरे मंतो, तुज्झ पणामोवि बहुफलो होइ ।
नरतिरिएसु वि जीवा, पावंति न दुक्खदोहग्गं ।।३।।

तुह सम्मत्ते लद्धे चिंतामणिकप्पपायवब्भहिए ।
पावंति अविग्घेणं, जीवा अयरामरं ठाणं ।।४।।

इय संथुप्रो महायस !, भत्तिभरनिब्भरेण हियएण ।
ता देव दिज्ज बोहिं, भवे भवे पास जिणचन्द ।।५।

धरणेन्द्रनतं नत्वा, श्रीपार्श्वं मुनिपुङ्गवम् ।
उपसर्गहरस्तोत्रे वृतिं वक्ष्ये समासतः ।।१।।

प्रणतसुरासुरललाटविन्यस्तमुकुटश्रेणिसमाश्रितमेचकक्रचूड़ामणिदंभोलिप्रमुखरत्नप्रभाप्राग्भारप्रकाशितपादपंकेरुहस्य श्रीपार्श्वनाथस्य सबन्धिमंत्रस्तोत्र "उपसर्ग हरं" नामप्रख्यातं पंचगाथाप्रमाणं तस्य मया कथितवृद्धयोपदेशेन अस्यैव स्तोत्रककल्पनानुसारेण चात्मनः स्फुटावबोधनिमित्तं संक्षिप्तवृत्तिर्विधीयते ।

आद्यगाथा व्याख्यातुकाम आह--

उवसग्गहरं पासं पासं वंदामि कम्मघणमुक्कं ।
विसहरविसनिन्नासं, मंगलकल्लाणआवासं ।।१।।

अस्या व्याख्या-वंदामि-स्तौमि, कं कर्मतापन्नं पार्श्वनाथं स्वामिनं अशोकाद्यष्टमहाप्रातिहार्यपूजा-समन्वितं चतुस्त्रिंशदतिशयोपेतं त्रयोविंशतितमं तीर्थङ्करं श्रीपार्श्वनाथस्वामिनम् । समवसरणं भूतलांतः-

सर्वबाह्यान्तसंबंधापन्नमनेप्राकारत्रयालङ्कृतगोपुररत्नमयकपिशीर्ष-कतोरणविराजितम् अवनितलमायोजननीहारिणीप्रसरद्भव्यलोकहृद-यानदकारिणीप्रधानार्द्धमागधभाषाविशेषणा समकालमेवचित्तस्वरूप नरामादिजंतुसंशयसंदोहापोहसमुत्पादनेन स्वविहारपवनप्रसरेण पंच पंचविंशतियोजनप्रमाणचतुर्दिग् भागमहामण्डलमध्ये सर्वव्याधिरजोरा-शेरपसारणेन चतुर्विधश्रीश्रमणसंघदेवनरेन्द्रदानवचारणविद्याधर-किन्नरनरनारीतिर्यश्च(क)प्रभृतिभिरमृतरसपीयमानं निरंतरं चित्ता-ह्लाददायि नमितिध्यानमित्युच्यते-पुनरपि कथं भूतं उवसंग्ग-हरमिति कः शब्दार्थ उच्यते-सृज विसर्ग्गे-इत्यस्य धातोरुपशब्दपूर्व-कस्य उपसर्जनमुपसर्ग्गः भावे घञ् प्रत्ययः नामिनश्चोपधायालघोरि-त्यनेन सूत्रेण गुणे कृते पश्चाच्चजोः कगौ बुद्धचानुबंधयोरित्यनेन सूत्रेण गादेशे कृते "उपसर्ग्ग" इति सिद्धम्। हृञ्-हरणे इत्यस्य धातोः हरणं हरः स्वरविधिगमिग्रहामल्प्रत्ययः नाम्यंतयोर्धातु विकरणयो-र्गुणः। हर इति सिद्धम्। उपसर्गहरं-प्रत्यूहविध्वसकमित्यर्थः। पार्श्व-मितिशब्देन पार्श्वनामा यक्षः स उच्यते। तत्र पार्श्वनाथतीर्थ समुत्पन्न-स्त्रायोविंशतितमो यक्षराट अष्टचत्वारिंशत्सहस्रयक्षपरिवृतः। श्रीपार्श्वनाथपादयुग्मसेवां करोति। पुनः कथं भूतं ? कर्मधनमुक्तम्। क्रियन्त इति कर्म्माणि घनानि च तानि कर्म्माणि च क्वचित्परनिपातो-पीति वचनात् कर्म्मघनानि तैर्मुक्तं, कर्म्मघनमुक्तं निविडकर्मरहितम्। इत्यर्थः। पुनरपि कथंभूतं विषधर-विषनिर्नाशं, विषधराणां विषं विषधरविषं तन्निर्नाशयति विषधरविषनिर्नाशस्तं, विषधर-विषनिर्नाशं-दुष्टसर्पविषविनाशकमित्यर्थः। पुनः कथं भूतं ? मंगल-कल्लाण आवासं, मंगलमिति कः शब्दार्थः उच्यते-अगि रगि लगि मगीति दण्डकधातुरस्येदिता तु मृधातोरिति विहिते औणादिकेऽलच् प्रत्यये तस्य अनुबन्धलोपे च कृते प्रथमैकवचनान्तस्य च मङ्गलमिति रूपं भवति मंगयते हितमनेनेति मंगलं, मङ्गयते-विधिना गम्यते

साध्यते इति यावत् अथवा मगेति धर्माभिधानं रा ला आदाने इत्यस्य धातोर्मङ्ग उपपदे आतोनुपसर्गात्क इति क प्रत्ययांतस्य अतो लोप इट् क्ङिति अनेन सूत्रेणाकारः लोपे च कृते प्रथमैकवच-नान्तस्यै व मङ्गलं शुभं सिद्धमिति कल्याणमिति कः शब्दार्थ उच्यते-अण रण इत्यादिदंडकधातोः कल्य शब्दपूर्वकस्य कल्यमणतीति कल्याणं कर्मण्यण् अस्योपधाया इत्यनेन सूत्रेण अकार-दीर्घत्वं, समानः सवर्णे दीर्घो भवतोत्यनेन दीर्घे कृते आकार लोपे च कृते द्वितीयेकवचनान्तस्यैव कल्याणं सिद्धमिति ! आवासमिति कः शब्दार्थः उच्यते-वसं निवासे इत्यस्य धातोः आङ् शब्दपूर्वकस्य आवासनमावासः भावे घञि कृते च अस्योपधाया इत्यनेन सूत्रेण दीर्घे कृते आवासं निवासं रमणीयस्थानं श्रीपार्श्वनाथजिनालयमिति गाथार्थः। अधुना वृद्धसंप्रदायः उपसर्गहरं पार्श्वं प्रत्येकमष्टयंत्रमन्त्र प्रदर्शनायाह—

ॐकार नामगर्भितस्य बाह्ये चतुर्दलेषु पार्श्वनाथेति दातव्यं, दलाग्रेषु हर इति न्यसेच्च बाह्ये ह हा हि ही हु हू हे है हो हौ हं हः वेष्टयेत् मायाबीजत्रिगुणावेष्टितं यन्त्रं प्रथमम्१, तथा ईकारं नामगर्भितं शेषं पूर्ववत् द्वितीयं यन्त्रम् २, मायाबीजस्य नाम-गर्भितस्य बहिः चतुर्दलेषु पार्श्वनाथदातव्यं बहिः हर हर निरन्तरं पूरयेत् बाह्ये द्वादश हहा इत्यादिभिर्वेष्टयेत् बाह्ये अकारादि-क्षकारपर्यन्तैर्वेष्टयेत् मायाबीजं त्रिगुणं वेष्ट्यं तृतीयं यन्त्रं३, हूंकारस्य नामगर्भितस्य शेषं पूर्ववत् सर्वं द्रष्टव्यं ४, हूं क्ष्मूं नाम गर्भितस्य वकारं वेष्टयेत्, बाह्ये षोडशस्वरयुतं षोडशदलं ततो त्रिमायिया वेष्ट्य पञ्चमं यन्त्रं५, वं झं नाम-गर्भितस्य बहिरष्टदलेषु पार्श्वनाथाय स्वाहा दातव्यं शेषं पूर्व-

वत्६, यन्त्रं षष्टं हुकार नाम गर्भितस्य बाह्ये मायया वेष्टयेत् बहिः ॐ पार्श्वनाथाय स्वाहा वेष्टयं त्रिगुणमायया च वेष्टयं इति सप्तमं यन्त्रं ७ एतेषां सप्तयंत्राणामपि कुंकुमगोरोचनया भूर्यपत्रे संलिख्य कुमारीसूत्रेणावेष्टय वामभुजदण्डे धारणीयं जगद्वल्लभः सौभाग्ययशोलक्ष्मीवृद्धिः भूतपिशाचराक्षसज्वरग्रहदोषशाकिनी विषविषधरप्रभृति भयरक्षा भवति। ॐ ह्रीं श्रों हर हर स्वाहा त्रिसंध्यं अष्टोत्तर शतश्वेतपुष्पैः दिनत्रयं श्रीपार्श्वनाथसमपे जापात् सिद्धयति अयं सर्वयन्त्रपूजामन्त्रः अनेन सर्वसम्पदादिकं भवति। ॐ ग्म्ल्व्यूं गरः त्रिशूलमुद्रया ग्रां ग्रीं ग्रूं ग्रौं ग्रः हर हर छिंद२ भिंद२ विदारय२ क्म्ल्व्यूं व्रां व्रीं व्रूं व्रौं व्रः हाः२ ताडय२ घ्म्ल्व्यूं घ्रां घ्रीं घ्रूं घ्रौं घ्रः यूं२ हूं२ फट्२ ह्म्ल्व्यूं ह्लां ह्लीं ह्लूं ह्लौं ह्लः हा२ घे२ कठोरमुद्रया ज्वल२ ज्वालय२ प्रज्वल२ प्रज्वालय२ ॐ नमो भगवते पार्श्वयक्षाय चंडक्रोधाय सप्तफटाय ह्लूं क्ष्रूं श्रूं स्म्ल्व्यूं श्रां श्रीं श्रूं श्रौं श्रः हा२ घे२ वज्रासित्रिशूल-धारया हन२ इदं भूतं हन२ दह२ पच२ त्रासय२ खर२ खाहि२ मन्त्रराज आज्ञापयति हुँ फट् स्वाहा पार्श्वयक्षमन्त्रः। अधुना भूतपिशाचप्रेतप्रभृतिरक्षामाह--आग्नेयमण्डलत्रयं त्रिकोणेषु रंकारं दातव्यं ज्वालाग्रे रेफस्वस्तिकं भूषितं तन्मध्ये स्म्ल्व्यूं संलिख्य बाह्ये ॐ र्म्ल्व्यूं र र र र र र र रां रां ह्लां २ ह्लीं २ आं क्रों क्ष्वीं ह्रीं क्लीं ब्लं द्रां द्रीं पार्श्व यक्षिणी ज्वल २ प्रज्वल २ दह २ पच २ इदं भूतं निर्घाटय २ धूमांधकारिणी ज्वलन शिखे हूँ फट् ३ यः मातृदूतिकासहिते पार्श्वयक्षिणी आज्ञापयति स्वहा। एत-न्मंत्रेण वेष्टयेदुच्चाटयेच्च दोषं इमं पिंडं ललाटे ध्यायेदग्निवर्णं सर्वांगे भूतज्वरं शाकिनी प्रभृतीनाशयतीत्यर्थः। इदं मन्त्रद्वयं भूततिथावुपोष्य

भोगपूर्वं साष्टशत जपेन साध्यदोषनिग्रहाय। इदानीं भूतमन्त्रानन्तरं सर्वविषापहारमाह-विषधरविषनिर्नाशं भावनामाह-ॐ क्ल्व्र्यूं वं वः वं वं वं हां आं क्रों क्षीं ह्रीं क्लीं ब्लूं ड्रां ड्रीं ज्वालामालिनी झंकारिणी मातृदूतिसहिते विषं निर्विषं कुरु २ स्थावरविषं अङ्गजं कृत्रिमं विषं जाठरं योगजं जंगमविषं अपहर २ इमं डंकं अमृतेन अत्ति-सिंचय २ उत्थापय २ दंडेनाक्रम्य विषमविषं ठः ३ ज्वालामालिन्या ज्ञापयति स्वाहा। पुरुषप्रमाणं दडं गृहीत्वा अष्टोत्तरशतमभिमन्त्रये-त्ताडयेत्सान्निध्यात्सर्वसंधिषु कालदष्ट उत्तिष्ठति। ॐ नमो भगवति श्रीघोणे हर २ दर २ घर २ लब्ध २ ज्वर २ सांचस ३ मं २ क्ष २ क्षीं ह्रीं ह्रां ३ ह्रूं भगवति श्रीघोणे यः ३ सः ३ ठः ३ डः ३ र ३ घे ३ भीं ३ वीं वरविहंगममा भुजेष नदार्खे खरि सोसय ३ गं ३ ठः ३ फुट् स्वाहा श्रीघोणसमत्रः ! ॐ नमो भगवति श्रीघोणे हर २ दस २ दर २ सर २ घर २ नव हंरसा २ क्षः ठः ह्म्ल्व्र्यूं टम्ल्व्र्यूं भ्म्ल्व्र्यूं स्म्ल्व्र्यूं द्म्ल्व्र्यूं सर्पस्य गतिं स्तम्भं कुरु कुरु स्वाहा एतन्मन्त्रद्वयं स्मरेत्त्रि-सन्ध्यं सर्पभयं नाशयति। ॐ नमो भगवते श्रीपार्श्वनाथाय पद्मावती-सहिताय हिलि २ मिलि २ चिलि २ किलि २ ह्रां ह्रीं ह्रूं ह्रौं ह्रः क्रां ३ यां ३ हंसः २ ह्रूं फुट् स्वाहा। सर्वज्वरनाशनमन्त्रः। ज्वरानन्तरं देवकुलं दर्शयन्नाह, तद्यथा टम्ल्व्र्यूं क्ष्म्ल्व्र्यूं, स्म्ल्व्र्यूं नामगर्भितस्य बाह्ये प्रत्येकं ह्म्ल्व्र्यूं वेष्टयेत् बाह्ये षोडशस्वरैः पूरयेत् तद्बहिरष्टदलेषु क्म्ल्व्र्यूं चम्ल्व्र्यूं द्म्ल्व्र्यूं तम्ल्व्र्यूं क्ष्म्ल्व्र्यूं वम्ल्व्र्यूं धम्ल्व्र्यूं मम्ल्व्र्यूं, एवं क च ट त क्ष व ध म पिंडाक्षराणि लेख्यानि, बहिरष्टपत्रेषु ब्रह्माणी, कुमारी, ऐन्द्राणी, माहेश्वरी, वाराही वैष्णवी, चामुण्डा, गणपतयः ॐकारपूर्वं नमोन्तं लिख्यते तद्बाह्ये ट्म्ल्व्र्यूं यः हाः हाः आं क्रों क्षीं ह्रीं क्लीं ब्लूं ड्रां ड्रीं पार्श्वयक्षिणी मातृ ब्रह्माणीदूतिका-

सहिते नमः वेष्टय पूर्वोक्त क्रमेण क कारादिहकारपर्यन्तं पिंडाक्षराणि बिन्दुकला विभूषितानि वेष्टयेत् बाह्ये मायाबीजं त्रिधा वेष्टयेत् यन्त्रं। अस्य मन्त्रं ॐ आं क्रों क्ष्वीं क्लीं ब्लूं ड्रां ड्रीं ज्वालामालिन्यै नमः कुंकुमादिलिखितं अनेन मन्त्रेण साष्टशतपुष्पैः पूजितं सर्वं विषोपद्रवं नाशयति। प्रथम गाथा यन्त्राणि मूलविद्यां अष्टोत्तरशतं निरन्तरं त्रिसन्ध्यं ध्यायमानस्य सर्वसिद्धिवृद्धिलक्ष्मीर्भवति। इदानीं प्रथम गाथायाः कल्पानुसारेण मन्त्रयन्त्रं च ध्येयम्। व्याख्यातगाथायाः अनन्तरमष्टारमष्टवलयं चक्रं सप्रपञ्चमाह--

विसहर फुलिंग मन्तं, कण्ठे धारेइ जो सया मणुओ।
तस्स गहरोगमारी - दुट्ठ जरा जन्ति उवसामं ॥२॥

अस्या व्याख्या--

यान्ति गच्छन्ति के एते कर्त्तारः ग्रहरोगमारिदुष्टज्वरा इति आदित्यादि प्रभृतयोऽष्टाशीतिग्रहाः पीडां नाशयंति। रोगा वातपित्त श्लेष्मादयः मारि क्षुद्र-जंतुयन्त्रमन्त्रयोगिनीकृता महाघोरोपसर्गा ज्वरमारिप्रभतयः दुष्टज्वरोऽनेक प्रकारः वातज्वरः पित्तज्वरः विषमज्वरः नित्यज्वरः वेलाज्वरः, मुहूर्त्त ज्वरादयः। कं कर्म्मतापन्नं उपशामं विनाशं यान्तीत्यर्थः कस्य तस्य यः किं,यो मनुजः पुरुषो धारयति व्यवस्थापयति कं कर्म्मतापन्नं विषधर स्फुलिंग मंत्रं तं विषधरस्फुलिंगमन्त्रो य लक्षणतयैकप्रकारः पंचनमस्कारः चक्र मष्टारमष्टवलयारमुच्यते तद्यो धारयति कंठे निरन्तरं एकाग्रमानसो ध्यायमानं सर्वकल्याणसंपदः कारणमित्यर्थः कथं सदा सर्वकालमिति गाथार्थः। अस्य भावनाविशेषतो वृद्धसंप्रदायः प्रथमं तावदष्टारमष्ट-वलयारमध्ये ह्रीं कारं नामगर्भितस्य बहिरष्टदलेषु ॐपार्श्वनाथाय ह्रीं नमः संलिख्य दक्षिणपार्श्वे पार्श्वयक्षं स्थाप्य वामपार्श्वे पार्श्व-यक्षिणीं स्थाप्य बाह्ये चतुर्दिक्षु ॐ ब्रह्मणे नमः, ॐ धरणेन्द्राय नमः, ॐ नागाय नमः, ॐ पद्मावत्यै नमः, आलिख्य बाह्ये षोडष-स्वरान् वेष्टयेत् बहिरष्टपत्रेषु ॐ ह्रीं श्रीं ह्रूं १ नमिऊण २ पास ३

विसहर४ बसहजिण५ फुलिंग६ ह्रीं ७ नमः८ आलिख्यते तद्बहिरष्ट-पत्रेषु ॐनमोअरिहन्ताणं ह्रीं नमः ॐनमो सिद्धाणं ह्रीं नमः ॐनमो आयरियाण ह्रीं नमः ॐनमो उवज्झायाणं ह्रीं नमः ॐनमो लोए सव्वसाहूण ह्रीं नमः ॐनमो ज्ञानाय ह्रीं नमः ॐनमो दर्शनाय ह्रीं नमः ॐनमो चारित्राय ह्रीं नमः आलिख्य तद्बाह्ये षोडषपत्रेषु षोडश विद्यादेवीनां नामानि तद्यथाः ॐ रोहिण्यै नमः प्रज्ञाप्त्यैः,धज्रश्रृंखला, वज्राङ्कुशी अप्रतिचक्रा पुरुषदत्ता, काली, महाकाली, गौरी, गान्धारी, सर्वास्त्रा महाज्वाला, मानवी, वैरोट्या, अच्छुप्ता, मानसी, महामानसी, प्रणवादिनमोन्तं सर्वासु द्रष्टव्यं, तद्बाह्ये चतुर्विंशति तीर्थंकरजननीनामानि, तद्यथा—ॐ ह्रीं मरुदेव्यैनमः १, विजयायै२, सेनायै३, सिद्धार्थायै४, मङ्गलायै५, सुसीमायै६, पृथिव्यै७, लक्ष्मणायै८, रामायै९, नंदायै१०, विष्णुवे११, जयायै१२, श्यामाये१३, सुयशायै१४, सुव्रतायै१५, आविरायै१६, श्रियै१७, देव्यै१८, प्रभावत्यै१९, पद्मावत्यै२०, वप्रायै२१, शिवादेव्यै२२ वामादेव्यै२३, ॐह्रीं त्रिसलायै नमः २४, ॐ ह्रीं आदौ 'नमोन्तं' सर्वासु द्रष्टव्यं तद्बाह्ये षोडशपत्रेषु ॐ इन्द्राय ह्रीं नमः, ॐ जयायै ह्रीं नमः, ॐ अजितायै ह्रीं नमः ॐयमाय ह्रींनमः,, ॐअपराजितायै ह्रीं नमः, ॐनैरत्याय ह्रीं नमः ॐजंभायै ह्रीं नमः, ॐ वरुणाय ह्रीं नमः, ॐ मोहायै ह्रीं नमः ॐवायवे नमः ॐकुबेराय१ नमः, ॐ कुबेराय नमः, ॐ ताराय नमः, ॐ ईशानाय नमः, ॐ विजयाय ह्रीं नमः, इत्यादि लिख्य तद्बहिरष्टपत्रेषु ॐ आदित्याय नमः ॐ सोमाय नमः, ॐमङ्गलाय नमः, ॐ बुधाय नमः, ॐ बृहस्पतये नमः ॐशुक्राय नमः, ॐशनैश्चराय नमः, ॐ राहुकेतुभ्यां नमः, बाह्ये मायाबीजं त्रिगुणं वेष्टयेत् माहेन्द्रमण्डलं वज्राङ्कितं चतुष्कोणकेषु क्षिकारमालिख्य ललक्षिक्षि इति युग्मकलितं तन्मध्ये चक्र स्थाप्यं कुंकुमादि लिखित जात्यादि पुष्पैः पूजयेत् त्रिसन्ध्यं लक्ष्मीकरं अस्य

चक्रस्य सम्बन्धीमूलमंत्रः ऐं ह्रीं श्रीं क्लीं १ ॐ वीराय ह्रीं नमः इति पाठान्तरे ।

क्रों १ष्सौं ब्लूँ अर्हं ह्रीं नमः ॐनमो भगवउ अरिहउ पासस्स सिज्जउ मे भगवइ महइ महाविज्जाउग्गे, महाउग्गे उग्गजसे, पासे२ सुपासे पस्समालिणी ठ ३ स्वाहा एयाए विज्जाए गामं नगरं पट्टण कव्वडं घरं खित्तं गिरिं कुठागारं वाहुइ कम्मं वा निहुयं दासं वा, खेमं शिवं :नीरोगं माणुसं बहुदव्वं सुपीइसुखासुखामुखा पावहर ॐवम्माए विसपुत्ति सवाहणि स परिकरि मज्झं आगच्छ२ अत्र स्थाने तिष्ठ२ स्वाहा आह्वाहनन मन्त्रः द्वितीयं वृहच्चक्र कल्पानुसारेण चिंतामणि नाम चक्रस्य संबंधि विस्तरेण वीजाक्षरं दर्शयन्नाह: षट्कोण मध्ये ऐं ह्रीं श्रीं ह्रं संलिख्य कोणेषु ह्रीं कारं दत्त्वा कोणेषु बाह्ये श्रीं कारं दत्त्वा त्रिगुणमायया वेष्ट्यं अष्टार-मष्टवलयारमध्ये ॐ ह्रीं श्रीं ह्रं वा१ ह्रं ह्रूँ क्ष्रूं वा२ ह्रीं श्रीं वा ३ ऐं ह्रीं वा४ श्रीं ह्रीं वा५ ह्रं भं वा ६ ह्म्म्ल्व्य्र्यूँ वा ७ मध्यभागे ह्रं कारं नामगर्भितमालिख्य बाह्ये चतुर्दलेषु ॐ ह्रीं श्रीं ह्रीं पार्श्वनाथ संलिख्य बाह्ये ह्रींकारं वेष्ट्यं त्रिगुणं भूर्जे सुद्रव्यैर्लेख्यं एतत्क्रमेण सप्त यन्त्राणि भवन्ति बहिरष्टकाणोपेतं चक्रमालिख्य कोणेषु ॐ ब्म्ल्व्य्रूँ ब्रह्मणे नमः२ ॐध्म्ल्व्य्रूँ धरणेन्द्राय नमः२ ॐ न्म्ल्व्यूँ नागाय नमः ३ ॐ पम्ल्व्य्रूँ पद्मावत्यै नमः संलिख्य बाह्ये ह्रीं ॐ हः ३ देव आसय २ ॐ क्ष्वीं ३ स हं स यः ३ क्षिप ॐ स्वाहा ह्रीं क्षौं नमः सवेष्टय बाह्ये षोडशदलकमलमध्ये षोडशा-क्षराणि प्रथममध्यदले द्वौ द्वौ संलिख्य ऊर्द्ध्वभागे दलाग्रे ओ३म् ह्रीं श्रीं अर्हं नमिऊण पासविसहर वसह जिणफुलिंग ह्रां श्रीं नमः पुनरपि बाह्ये कमलदलेषु ॐ नमो अरिहन्ताणं ह्रीं नमः, ॐनमो सिद्धाणं ह्रीं नमः ॐनमो आयरियाणं ह्रीं नमः ॐ नमो उवज्झायाणं ह्रीं नमः ओ३म् नमो लोएसव्वसाहूणं ह्रीं नमः ओ३म् नमो नाणाय ह्रीं नमः ओ३म् नमो दरिसणाय ह्रीं नमः

ॐनमश्चारित्राय ह्रीं नमः त्रिदिगरेषु ओ३म् उवसग्ग हरं १ पासं २ पासं वंदामि ३ कम्मघण मुक्कं ४ विसहर ५ विसनिन्नासं ६ मङ्गल ७ कल्लाण आवासं ८ स्वाहा इति संलिख्य ततो बाह्ये अष्टदलेषु अनंत-कुलिक-वासुगि-शंखपाल-तक्षक-कर्कोट-पद्म-महा-पद्म-ओंकार पूर्वं नमोन्तं लिख्य विदिगरेषु ओ३म् विसहर १ फुलिंगमंत २ कंठे धारेइ ३ जो सया मणुओ ४ तस्स गह ५ रोगमारी ६ दुट्ठजराजंति ७ उवसामं ८ स्वाहा संलिख्य बाह्ये पुनरपि षोडशदले षोडश विद्यादेव्य नामानि दलेषु प्रत्येकं २ ओ३म् ह्रीं पूर्वं नमोन्तं संलिख्य बाह्यद्दलेषु प्रत्येकं इन्द्र-अग्नि-यम-नैरुत-वरुण-वायु-कुबेर ईशान-नाग ब्रह्मणां ओंकार पूर्वकं नमोन्तं संलिख्य विदिगरेषु चिट्ठउ दूरे १ मंतो २ तुज्भपणामो वि ३ बहुफलो होई ४ नरतिरिए ५ सुविजीवा ६ पावंति ७ न दुक्खदोहग्गं ८ स्वाहा इति संलिख्य तद्बाह्ये चतुर्विंशतिदलेषु आदित्य-जया-सोम-अजिता-मङ्गल अपराजिता-बुध-जंभा-ब्रहस्पति-मोहा-शुक्र-गौरी-शनैश्चर-गांधारी राहुकेतुः संलिख्य विदिगरेषु तुह सम्मत्ते लद्धे १ चिन्तामणि २ कप्पपाय ३ वब्भहिए ४ पावन्ति ५ अविग्घेण ६ जीवाअयरामरं ७ ठाणं स्वाहा ८ संलिख्य ततः ओ३म् वम्मादेवि सउत्तिसवाहणि, सपरिकरि मब्भि आगच्छ २ अत्रस्थाने तिष्ठ २ स्वाहा । त तो माया-बीजं त्रिगुणं वेष्टयं माहेन्द्र १ क्ष्रौं अग्रे च सों ग्ले ब्लौं हां नमः इति पाठान्तरे।२ पाठान्तरे तु ब्रं। ३ ज्वों इत्यपि पाठः। वज्राङ्कितस्य चतुःकोणेषु क्षिकारं देयमिति चक्र श्वेतवस्त्र श्वेताभरणानि निरन्तरं त्रिसंन्ध्यं ध्यायेत् अष्टोत्तर शतैः पुष्पैजापः क्रियते सर्व संपत्करं चक्र कुङ्कुम गोरोचनादि सुरभिद्रव्यैर्भूर्यपत्रे संलिख्य कण्ठे धारणीयं शरीर रक्षां करोति द्वितीयचक्रमिति । इदानीं चिंतामणि वृहच्चक्रा-नन्तरं शुभाशुभं यन्त्रं सप्रपञ्चमाहः—

चिट्ठउ दूरे मंतो, तुज्झ पणामो वि बहुफलो होइ।
नर तिरिएसु वि जीवा पावन्ति न दुक्ख दोहग्गं ॥३॥

अस्य व्याख्या:-तिष्ठतु आस्तां दूरे व्यवहित देशे रमणीय इत्यर्थः पञ्च नमस्कार संबन्धी ॐ ह्रां ह्रूँ नमो अरिहंताणं ह्रीं नमः त्रिसन्ध्यं निरन्तरं अष्टोत्तर शत सितपुष्पैरेकान्तस्थाने जापेन क्रियमाणेन सर्वसंपत्करी लक्ष्मीर्भवतीति अथवा ध्यायेत् हरहासकाश संकाश शंखगोक्षीरहारनीहारकुंदेन्दुधवलनिबद्धं हृत्पुडरीके मानसे ध्याता धारणा संजातात् प्रत्येकोन्तं समापूरित ध्यान निरुद्धान्तःकरणवृत्तिर्यः आविर्भूतस्वरूपः पुण्य इवार्थनिर्भासः संजात समाधिविहितो अन्तर्ध्यानहेतुः संजमकृतमन्तर्द्धानं त्रिकालं संपत्करी वाञ्छितफलदायिनी सर्व कल्याणकारिणी ध्यानमित्युच्यते। तव भवतः प्रणामं प्रह्वीभावः इत्यर्थः वहुफलः प्रचुरफलः इत्यर्थः भवति विद्यते नरतिर्यक्षु-मनुष्यपशुष्वपि जीवाः प्राणिन इत्यर्थः। प्राप्नुवन्ति आसादयन्ति न दुःखदौर्भाग्यमिति पीडां लभन्ते भयमिति गाथार्थः। अपि शब्देन समुच्चयार्थेन यन्त्रं सूच्यते अस्य भावनामाह:-ह्रीं देक्ष् वहूं १ नामगर्भितस्य बहिरष्टदलेषु ह्रीं क्षूं ह्रीं ४ देवदत्त दातव्यं एतद्यन्त्रं कुङ्कुमगोरोचनादि सुगंधिद्रव्यै भूर्यपत्रे संलिख्य नारीबाहौ धारयन्ती वन्ध्या गुर्विणी भवति मृतवत्सा गर्भं धारयति काकवन्ध्या प्रसवति सर्वभूतपिशाचरक्षा भवति वंकारनामगर्भितस्य बाह्ये षोडश स्वरा वेष्टयेत् ॐ ह्रीं ह्रां ऐं क्षीं चामुण्डे स्वाहा बाह्ये वलयं पूरयेत् एतद्यन्त्रं कुंकुमगोरोचनादिसुगन्ध द्रव्यैः भूर्य पत्रे लिखित्वा बाहौ धारणीयं बालग्रहरक्षा भवति मायाबीजं नामगर्भितस्य बहिरष्टदलेषु ह्रीं दातव्यं एतद्यन्त्रं कुंकुमगोरोचनया भूर्यपत्रे समालिख्य स्त्री पुरुषो वा बाहौ धारयेत्। सौभाग्य भवति। वंकानामगर्भितस्य बहिश्चतुर्दलेषु वं कार दातव्यः। बहिरष्टपत्रेषु

र कारे दातव्यः । एतद्यन्त्रं भूर्यपत्रे कुंकुमगोरोचनया 'लेख्यं क्षुद्रोपद्रवं रौद्रोपसर्गमुपशमयति ह्रीं नाम गर्भितस्य बहिरष्टपत्रेषु ह्रीं दे ह्मल्व्र्यूं व ह्रीं दातव्यं एतद्यन्त्रं कुङ्कमगोरोचनया भूर्ये लिखित्वा कण्ठे हस्ते वा धार्यं चोर भयं न भवति । अघोरे विद्यानाम ह्रीं कारंनामविदर्भितस्य बहिरष्टदलेषु मायाबीजं दातव्यं एतद्यन्त्रं कुंकुम गोरोचनया भूर्ये लिखित्वा बाहो धारणीयं सौभाग्यं भवति मायाबीजं दातव्यं एतद्यन्त्रं कुंकुम गोरोचनया भूर्ये लिखित्वा बाहौ धारणीयं सौभाग्यं भवति माया गर्भितस्य बहिरष्टपत्रेषु ह्रींकार दातव्यं एतद्यन्त्रं कुंकुमगोरोचनया भूर्य पत्रे लिखित्वा बाहौ धारणीयं सर्वजनप्रियो भवति मायानामगर्भितस्य बहिरष्टपत्रेषु रकारं दातव्यं एतद्यन्त्रं कुंकुम-गोरोचनया भूर्ये लिखित्वा बालानां शान्तिपौष्टिककरी रक्षा भवति मायानामगर्भितं त्रिगुणं वेष्टयं बहिरष्टपत्रेषु ह्रीं कारं दातव्यं एतद्यन्त्रं कुकुमगोरोचनया भूर्यपत्रे लिख्य कण्ठे बाहुभ्यां धारयेत् । आयुषः अल्पमृत्यु ज्वरभूतपिशाचस्कंदादौ अपस्मारग्रहगृहितस्य बंधितस्य तत्क्षणादेव सुखं भवती ह्रीं श्रीं ह्रीं श्रीं ह्रों नामगर्भितस्य बाह्यषोडशपत्रेषु ह्रीं श्रीं दातव्यं एतद्यन्त्रं भूर्यपत्रे लिख्य कुंकुम-गोरोचनया दुर्भगनारीणां सौभाग्यं भवति ।

इदानीं पञ्चनमस्कारस्मरणायफलं सप्रपञ्चमाह—

तुइ सम्मत्ते लद्धे, चिंतामणिकप्पपायवब्भहिए
पावन्ति अविग्घेणं जीवा अयरामर ठाणं ॥४॥

अस्या व्याख्या--पाप्नुवन्ति लभन्ते के एते कर्त्तारः जीवाः प्राणिनः कं कर्मतापन्नं–अजरामरस्थान–शाश्वतस्थानं धवलं-गोक्षीरकुन्देन्दु–शंख-हरहास-नीहारसकाश–सिद्धिक्षेत्रं रमणीयं इत्यर्थः । पुनरपि कथंभूत अविघ्नेन निर्विघ्नं कस्मिल्लब्धे सम्यग् दर्शने प्राप्ते कीदृशे चिंतामणि कल्पपादकाधिके चिंतारत्न प्रकाश नव वज्र वैडूर्य महानील कर्केतन पद्मराग मरकत पुष्पराग चन्द्रकान्त रुचमेचका धनर्घ्य रत्नराशिपरिपूरितमित्यर्थः उक्तंचः—

कल्पवृक्षाः सुषमादिके दशप्रकारा दृश्यन्ते—

चत्तारि सागरोवम-कोडा कोडीण संतई एम्रो।
एगन्त-सुसमा खलु जिरोहिं सव्वे हिं निद्दिठ्ठा ॥१॥

तीए पुरिसाण आउं, तिन्नि उ पलिया उ तह य परिमाणं।
तिन्नेव गाऊयाइं आईए भणइ समयन्नू ॥२॥

उवभोग-परिभोगा जम्मंतर-सु कय बीय जाया म्रो।
कप्पतरु समूहाम्रो, हुंति किलेसं विणा तेसिं ॥३॥

ते पुण दसप्पयारा निद्दिठ्ठा समय के ऊहिं।
धीरेहिं कप्पतरुणो, रुक्खा समया गयो ए ए ॥४॥

मत्तंगया य भिंगा तुडियंगा दिव्व जोइ चित्तंगा।
चित्तरसा मणियंगा गेहागारा अणाया य ॥५॥

मत्तंगएसु मज्ज सुहपिज्जं भाइणाइं भिंगेसु।
तुडियंगेसु य संगयतुडियाणि बहुप्पया राइं ॥६॥

दीवसिहा जोइस नामगा य निच्चं करन्ति उज्जोयं।
चित्तंगेसु य मल्लं, चित्तरसा भोयणठाए ॥७॥

मणियंगेसु य भूसण वराणि भवणाणि भवण रुरकेसु।
आइन्ननेसु य पत्थिय-वत्थाणि बहुप्पगाराणि ॥८॥

एएसु य अन्नेसु य, नरनारिगणाण ताणभवभोगा।
पुव्व भव पुण्णरइम्रा इय सव्वण्णू जिणा बिंति ॥९॥

इत्यादयः कस्य संबंधिनी नव भवन्तीति गाथार्थः।
इदानीं स्तुतेरुपसंहारमाह:—

इय संथुम्रो महायस, भत्तिभर निब्भरेण हियएण।
ता देव दिज्ज बो हिं, भवे भवे पास जिणचन्द ॥५॥

अस्या व्याख्या-संस्तवः स्तवनकोऽसौ महायशाः महाकीर्तिः पुनरपि कथंभूतः भक्तिभरनिर्भरेण हृदयेन बहुमानसर्प्पितेन चेतसा कथमित्यमुना प्रकारेण । पर्यन्तशान्तिपौष्टिकयन्त्रमन्त्रयुतमुच्यते तस्माद्देव देहि बोधिं यस्मादेवं तस्माद्धि देव कं कर्म्मतापन्नं बोधि-

सम्यक् त्वं भवे २ पार्श्वजिनचन्द्रः जन्मनि २ हे श्रीपार्श्वनाथस्वामिनो नामग्रहणेन क्षुद्रोपद्रवानां नाशनमिति गाथार्थः । अस्य भावमाह– वं भं ह्वं पक्षिनामगर्भितस्य बहिः ठकारं वेष्टयेत् बहिः षोडशस्वरै-रावेष्टय बहिरष्टदलेषु पार्श्वनाथ ह्रीं श्रीं स्वाहा बाह्ये द्वादशपत्रेषु हर हर दातव्यं बाह्ये क्ष्वीं क्ष्वीं हंसः वेष्टयेत् बाह्ये हंकारयुगं संपुटस्थं बहिः पकारयुग्मसंपुटस्थं बहिः क्ष्वींकारं त्रिगुणं वेष्ट्यं एतद्यन्त्रस्य मन्त्रः ॐ भं वं ह्वः पक्षि क्ष्वीं क्ष्वीं हंसः स्वाहा। एतन्मन्त्रेण श्वेतपुष्पैरष्टोत्तरशतप्रमाणैर्दिनत्रयं यन्त्रं पूजयेत्। शांतिक-पौष्टिकज्वररुक्शाकिनीभूतप्रेतराक्षसकिन्नरप्रभृतीन्नाशयति। यन्त्रं तु शुभद्रव्यैर्भूर्यपत्रे सलिख्य कुमारीसूत्रेण वेष्ट्य बाहौ धारणीयं सर्वसम्पत्कल्याणकरो यन्त्रोऽयं भवति। द्विजपार्श्वदेवगणिविरचितं यत् किमपि धरणेन्द्रपार्श्वयक्षपद्मावतीप्रमुखाभिः स्वदेवताभिर्मम क्षन्तव्यमिति यच्च किञ्चिद्विरूपं मन्त्र भाष्ये तस्य सर्वस्य मिथ्या-दुष्कृतमिति।

इति श्री उपसर्गहरस्तोत्रवृत्तिः ॥

—❀—

धरणोरगेन्द्र स्तवन

धरणोरगेन्द्रसुरपति, विद्याधर पूजितं जिनं नत्वा,
क्षुद्रोपद्रवशमनं, तस्यैव महास्तवं वक्ष्ये ॥१॥

सुरलोकनाथपूजित हर हर हर हार रोषजुष्टमपि ।
पन्नगविषं महाबल शुक्लध्यानानलात्क्षिपेत् ॥२॥

विद्यासहस्रषोडश-गणनायकवीरवर्द्धितानंदः ।
पन्नगकुलं कुलोत्तम निर्विषतां नय नयाभिगमात् ॥३॥

सर्वेऽपि महानागा नागाधिपकृतफणतपच्छाया ।
कलिकुंड दंड निहता, नश्यंति विषापहारेण ॥४॥

ॐ कार संपुटगतं वामकरे दण्डरूपकं ध्यातं ।
ज्वालाभिः परिस्फुरितं कलिकुण्डाज्ञामवा मोघं ॥५॥

नाशयति सर्वनागान् भूतान् व्यालाँ ग्रहाँश्च विस्फोटान् ।
ज्वाला गर्दभशाकिनी-विषवेगांश्चापि रोगांश्च ॥६॥

मारणं स्तंभनं चैव, शत्रोरुच्चाटनं तथा ।
मोहनं द्वेषणं चापि, क्रियाभेदात् करोति तत् ॥७॥

दैत्यामरेन्द्र पूजित निर्नाशित दुष्ट कर्ममलपटल:
क्षपय जिन हुं फुट त्वं पन्नगकुलविषमविषदर्पम् ॥८॥

निर्मथितभयोल्वण षोडश-विद्याधिपत्वमुपपन्नम् ।
श्रीपार्श्वनाथ विषहर हलि २ मातंगिनी स्वाहा ॥९॥

ॐ हर हर हुतभुक् पत्रनैरितिज्वलत्तमंकुशं ध्यायेत् ।
प्रक्षालयति सरोषं, पुनरुक्तं भोग हस्तोयऽम् ॥१०॥

आगच्छन्तु महानागाः पन्नगाश्च महाविषाः
गरुडस्येमां विद्यां हलि २ मातंगिनी स्वाहा ॥११॥

श्रीपार्श्वनाथ सुरपति मुकुटतटोद्घृष्टपादनलिनयुगः
नागाष्टकुलविषापह हा हि हो हे है हो हौ ह हः ॥१२

सकलभुवनाभिनंदित गरुडस्त्वं पन्नगेन्द्रकृतपूजः ।
विषम विषानलशमनो जलदैवज जलप्लुतालोकः ॥१३॥

दैत्योपसर्ग भीषण-जलधरधारानिपातधौतमलः ।
सर्वज्ञ नाग वंदितसर्वविषाक्षेपण नमस्ते ॥१४॥

ॐ हन २ दह २ पच २ मथ २ संहर२ क्षप हुं च बालकलिकुंड ।
धम २ पूरय २ विषोल्वण हुं फुट २ स्वाहा ॥१५॥

ॐ पच २ मरु २ फुरु २ फार २ फलदस्त्वम् ।
किलि २ किलि २ कलितैः कुलिकुंड कला कलापज्ञः ॥१६॥

ॐ यः यः सः सः हः हः चः चः उसरिल्लिरुहरुहांत सं त स्त्वं ।
विषवह्नि विध्यापनं कुरु शीघ्रमुरुप्लवाख्यानात् ॥१७॥

दंष्ट्राकरालभीषणकषितासुरजलदजलधरापातैः
अभ्यस्त तपोजलजाज्वलंत दुह दुष्टनागविषं ॥१८॥

कमलदलस्थितदिक्पतिमध्ये भुजगावृतां जिनं नत्वा ।
षोडशदेव्योपगतं बीजाक्षरसयुतं तद्धी ॥१९॥

वंध्यानां सुतजननं म्रियमाणापत्यरक्षणपरमम् ।
पद्ममिदं रोगहरं ग्रहशाकिनीभूतनिर्नाशं ॥२०॥

दुष्टक सर्वांगगतं पद्ममिदं ध्यायतोऽमृत प्लवहं ।
कुर्याद्विषापहारं प्रणवाद्यैः पंचभिर्वर्णैः । २१॥

व्यस्त-समस्तविपर्यं बहुधा परिकल्प पंचभिर्वर्णैः ।
जिननामाक्षारसहितैः पदं २ सर्व विषमथनं ॥२२॥

'क्षिप ॐ स्वाहा पंचकर्मनिदितं पंचभूतकृत कल्पं ।
नागाष्टकुलोपेतं सत्वरजस्तमः कलानुगत ॥२३॥

रेफं संपुटमध्यस्थं, ककारं वह्निमडले ।
आशंत दीपवर्णाभं त्रासयेत्त्रिदशानपि ॥२४॥

नीलोत्पलदलस्यामं, हकारं यो परिस्थित ।
ठकारं वेष्टित शुद्धं पर्वतानपि चालयेत् ॥२५॥

लसद्ध्वजध्वजाक्रांतं इन्द्रगोपुरमध्यगं ।
पद्म किंजलकसंकासं स्तंभये त्रिपुरांतकम् ॥२६॥

कुंदेंदु शंखवर्णाभं, निर्वाहं यस्तु चिंतयेत् ।
निर्विषं कुरुते क्षिप्रं विषं स्थावरजंगमम् ॥२७॥

हरहारशंखगौरं ठकारं कलशांतिगं ।
हकारं वेष्टितं शुद्धं प्लवगविषनाशनम् ॥२८॥

हस्तांगुलीषु संन्यस्तं वामकरे भूतपंचकम् ।
सकलमपहरन्ति विषं साधक मुष्टिक्रमा बंधात् ॥२९॥
धरणोरगेन्द्र-सुरपति-विद्याधर-दैत्यदेवताभिनतां ।
जिनगरुडमप्रमेयं चतुर्वर्णविभूषितं ॥३०॥
आजानुकनकगौरं आनाभिशंखकुंदहरधवलं ।
आकंठतो नवदिवाकरकांति तुल्य-
मामूर्द्धतोञ्जननिभं गरुडस्वरूपम् ॥३१॥ ॥३१॥
ॐ स्वर्ण २ पक्षं वैनतेय महाबलं
नागांतकं जितारिं (रिंच) अजितं विश्वरूपिणं ॥३२॥
विनितायाः सुतं दैत्यं, विहगं पन्नगेश्वरं ।
गरुत्मंतं स्वमेखं च तार्क्ष्यं काश्यपनंदनं ॥३३॥
द्वादशैतानि नामानि, गरुडस्य महात्मनः ।
यः स्मरेत्प्रातरुत्थाय, स्नातो वा यदि वा शुचिः ॥३४॥
विषं न क्रमते तस्य न च हिंसंति पन्नगाः ।
न दुष्टा द्रावयन्त्येवं सर्वकार्याणि साधयेत् ॥३५॥
एवं भूतैश्च यो नागैः पार्श्वनाथं स्मरेज्जनः ।
तस्य दोषाः प्रणश्यंति, विषं च प्रलयं व्रजेत् ॥३६॥
ग्रहदुस्थसुस्थजननं, सर्वविषोच्छेदनं प्रशांतिकरम्ः ।
प्रध्वस्तदुरितनिचयं पार्श्वं योगीश्वरं वंदे ॥३७॥
इति मालामंत्रपदै रभिष्टुतं यः स्मरेत्त्रिसंध्यमपि ।
स करोति नागक्रीडां शिव इव विषवेदनातीतः ॥३८॥
भक्तिर्जिनेश्वरे यस्य, गंधमाल्यानुलेपनैः ।
संपूजयति तश्चैनं यस्यैतत्सफल भवेत् ॥३९॥

इति धरणोरगेन्द्रस्तवनं श्रीपार्श्वदेवसत्कं मन्त्रमयं समाप्तः ।
पंडित श्री श्री श्रीविजय सौभाग्य । तत् शिष्य गणिमान
सौभाग्य लेखकः ।

श्री पद्मावत्यष्टकम्

श्रीमद्गीर्वाण चक्रस्फुटमुकुटतटी दिव्यमाणिक्यमाला·
ज्योतिर्ज्वालाकराला स्फुरितमुकुरिकाघृष्टपादारविन्दे ।
व्याघ्रोरोल्कासहस्रज्वलदनलशिखा लोलपाशांकुशाढ्ये ।
आं क्रों ह्रीं मन्त्ररूपे क्षपितकलिमले रक्ष मां देवि पद्मे ।।१।।

ऐं नमः । प्रणिपत्य जिनं देवं श्रीपार्श्वं पुरुषोत्तमम् ।
पद्मावत्यष्टकस्याहं वृत्ति वक्ष्ये समासतः । १।।

ननु किमिति भवद्भिर्मुनिभिः सद्भिः पद्मावत्यष्टकस्य.......... ..
....कथमस्यास्तुतेर्वृत्तिर्भवतां युक्ता ? मैवं, आशयानभिज्ञत्वात् । यतः सा हि तीर्थंकरस्य भगवतः श्रीपार्श्वनाथस्य शासनरताऽवितथ सम्यक्त्वयुक्ता जिनसदनरक्षयित्री सर्व्वभव्यजनानंददायिनी अष्ट·चत्वारिंशत्सहस्रपरिवारा एकावतारा श्रीपार्श्वनाथचरणोपासनतत्परा अतस्तस्या सम्बन्ध्यष्टकवृत्तिकरणे न दूषणमित्याशयः । अथ च पूर्व्वसूरिकृतस्यास्य स्तोत्रस्य वृत्तिकरणे किं प्रयोजनमिति चेत्? शृणु, त्रिविधं हि प्रयोजनम् । स्वपरोभयभेदात्तत्र स्वप्रयोजनमस्यार्था·विस्मरणलक्षणां विद्यत एव १ । तथा मत्तोप्यधिकमन्दबुद्धीनां केषांचिदस्य वृत्तेरर्थज्ञानं भावीति परप्रयोजनम् । अतएव उभय प्रयोजनमपि सुज्ञं । तत्त्रयमप्यत्रास्तीति निष्प्रयोजनशङ्काप्युदस्ता । तत्राद्यवृत्तमाह--

श्रीमदेति व्याख्या--हे देवि पद्मावति शासनदेवि ! मां रक्ष, पालय, कं मां ? स्तुति कर्त्तारम् । कीदृशे देवि ? श्रीमद्गी० श्रीर्विद्यते· येषां ते श्रीमन्तस्ते च ते गीर्व्वाणाश्च श्रीम० तेषां चक्रं समूहो श्रीमद्गीर्व्वाणचक्रं । माणिक्यानां माला माणिक्यमाला, दिव्या

चासौ माणिक्यमाला च दिव्यमा० । मुकुटानां तटी मुकुटतटी । तस्यां लग्ना या दिव्यमा० मुकुट० श्रीमद्गीर्वाणचक्रस्यस्फुटा मुकुट० श्रीम० माला । तासां ज्योतिस्तेजस्तस्य ज्वाला, तया करालं, स्फुरिता मुकुरिका स्फुरितमुकुरिका । श्रीमद्गीर्वाणचक्रस्फुट मुकुटतटीदिव्यमाणिक्यमालाज्योतिज्वालाकरालास्पुरितमुकुरिकाभि घृष्टे पादारविन्दे यस्या सा श्रीम० । तस्यां सम्बोधने हे श्रीम० । श्रीमत्त्रिदशनिकुरम्बकिरीटकोटीन्यस्तप्रधानरत्नमाला दीप्ति-शिखारौद्रस्फुर्यमाणमुकुरिकया० घर्षित चरणार विन्दे । पुनः कीदृशे ? व्याघोराश्च ता उल्काश्च व्याघोरोल्कास्तासां सहस्राणि व्याघो० ज्वलंश्चासावनलश्च ज्वलदनलस्तस्य शिखा ज्वल० पाशंश्च अङ्कुशश्च (ञ्च) पाशांकुशे, लोले च ते पाशांकुशे च लोलपाशांकुशे व्याघो० च लोलपाशांकुशाश्च तैराढ्ये । तारापतनज्वालासहस्र-देदीप्यमानाऽनलधाराचञ्चलपाशांकुशप्रहरणे । पुनः कीदृशे ? आं क्रों ह्रीं मन्त्ररूपे आं क्रों ह्रीं रूपो य एव मन्त्रस्तत्स्वरूपे पुनः किं भूते ? क्षपितकलिमले, विघटित पापमले, अस्य भावनामाह-श्रीकारं नागगर्भं तस्य बाह्ये षोडशदलेषु लक्ष्मी बीजमालिख्य निरन्तरं ध्यायमानं पिङ्गलादिद्रव्यैः सौभाग्यं भवति । द्वितीयरीत्या षट्कोणमस्य चक्रं मध्ये ऐंकारनाम-गर्भितस्य बाह्ये ... कारं दातव्य बहिरपि सें संलिख्य कोणेषु ॐ क्लीं ब्लूं द्रां द्रीं द्रूं संलिख्य मायाबीजस्त्रिविधमावेष्ट्य निरन्तरं स्मर्यमाणे काव्यशक्तिर्भवति । अथ तृतीयः षटकोणचक्रमध्ये ऐं क्लीं-नाम-मध्ये ततः कोणेषु ॐ ह्रीं क्लीं द्रवे नमः १ । ॐ ह्रीं क्लीं द्रावे नमः २ । ॐ ह्रीं खं दे नमः ३ । ॐ ह्रीं उमादे नमः ४ । ॐ ह्रीं द्रवे नमः ५ । ॐ ह्रीं द्रावे नमः ६ । ॐ ह्रीं पद्मिनीनाममालिख्य बहि-रष्टदलेषु मायाबीजं दातव्यं, बाह्येषु षोडशदलेषु भ्रौं संलिख्य बहि-रष्टदलाग्रे मायाबीजं संलिख्य मध्येषु ॐ आं क्रों ह्रीं जयायै नमः विजयायै नमः अजितायै नमः अपराजितायै नमः जयन्ती नमः विजयन्ती नमः भद्रायै नमः । ॐ ह्रीं जां ह्रीं शान्ताय नमः आलिख्य बाह्ये मायाबीजं त्रिगुणं वेष्टयं । माहेन्द्रचक्राङ्कितं चतुःकोणेषु

लकारं लेख्यम् । इदं चक्रं कुंकुमागोरोचनादि सुगन्धिद्रव्यैः भूर्ये विलिख्य मूलजापः ॐ आं क्रों ह्रीं धरणेन्द्राय ह्रीं पद्मावती सहिताय क्रों द्रं ह्रां फुट् स्वाहा श्वेतपुष्पैः पञ्चाशत्सहस्रमितो एकान्ते मौनेन दशांशहोमेनसिद्धिर्भवति । करजापलक्षेण प्रत्यहं ध्यायमानेन बुद्धिलाभः । सर्वसिद्धिः । शेषं सुगमम् । अथाद्यवृत्तानन्तरं माला-मन्त्रमयं द्वितीयं वृत्तमाह---

भित्त्वा पातालमूलं चलचलचलिते व्याललीलाकराले ।
विद्युद्दण्डप्रचण्डप्रहरणसहितैं सद्भुजैस्तर्ज्जयन्ती ॥
दत्येन्द्रं क्रूरदंष्ट्रा कटकट घटित – स्पष्टभीमाट्टहासे ।
मायाजीमूतमालाकुहरितगगने रक्ष मां देवि पद्मे ॥२॥

भित्वा० व्याख्या --हे देवि पद्मे शासनदेवी ! मां रक्ष, पालय ! कीदृशे ? चल २ चलिते चञ्चलगमने, किं कृत्वा ? भित्वा विदार-यित्वा, किं ? पातालमूलं असुरभुवनमूलमित्यर्थः। पुनः कीदृशे ? व्याललीलाकराले सर्प्पक्रीडारौद्रे इत्यर्थः । पुनः किं भूते ? विद्युद्दण्ड-प्रचण्डप्रहरणसहिते विद्युद्दण्डतुल्यप्रहरणयुक्ते तथा तर्ज्जयन्ती ताडय-न्ती कं ? दैत्येन्द्रं दानवेन्द्रं, कैः ? सद्भुजैः शोभनदोर्दण्डैः, पुनः किं भूते ? दंष्ट्रा कट २ कटितस्पष्टभीमाट्टहासे क्रूरदंष्ट्राणाम् कटकटः शब्दविशेषः तेन घटितः स्पष्ट भीमाट्टहासो यया सा तस्या सम्बोधने हे दंष्ट्राकट० मायाशब्देन मायाबीजमुच्यते ह्रींकारः। ह्रींकार-नामगर्भो तस्य बाह्येषु पत्रेषु षोडशसु मायाबीजं संलिख्य धारयेत् । मायाबीजं सप्तलक्षाणि जपेत् । सर्वकार्यसिद्धिर्भवति । माया एव जीमूताः मायाजीमूतास्तेषां माला मायाजीमूतमाला, तया कुहरित गगन यया सा, तस्याः सम्बोधनं हे माया० ह्रींकार जलधारनिकुरंबगर्ज्जिताम्बरे इत्यर्थः । इदानीं मायानामगर्भितस्य बहिरष्टपत्रेषु ह्रींकारं दातव्यम् एतद्यन्त्रं कुंकुमगोरोचनया लिखित्वा हस्ते बद्ध्वा सर्वजनप्रियो-भवति । मायाबीजनामगर्भितस्य बहिरष्टपत्रेष ह्रींकारं दातव्यं

कुंकुमगोरोचनया भूर्यपत्रे विलिख्य धारयेत् बालानां शान्तिकरी रक्षा भवति। यथा मायानामं विद्ध एतद्बहिरष्टदलेषु मायाबीजं दातव्यं एतद्यन्त्रं कुंकुमगोरोचनया भूर्ये लिखित्वा बाहौ धारणीयं सौभाग्यं करोति३ । ॐनमो भगवति पद्मावती सूक्ष्मधारिणी पद्मसंस्थिता देवी प्रचण्डदोर्दण्डखण्डितरिपुचक्रे । किन्नरकिम्पुरुषगरुड-गान्धर्वयक्षराक्षसभूतप्रेतपिशाचमहोरगसिद्धनागमनुजपूजिते विद्याधर-सेविते ह्रीं पद्मावती स्वाहा ।एतन्मन्त्रेण सर्षपमभिमन्त्रयेदेकविंशति-वारान् वामहस्तेन बन्धनीयम् । सर्वज्वरं नाशयति भूतशाकिनीज्वरं नाशयति । ;ॐनमो भगवती पद्मावती अक्षिकुक्षि मण्डिनीउज्जयन्त-वासिनी पूर्वद्वारं बंधामि, आग्नेय्द्वारं बन्धामि, दक्षिणद्वारं बन्धामि नैऋतद्वारं बन्धामि, पश्चिमद्वारं बन्धामि, वायव्यद्वारं बन्धामि, उत्तरद्वारं बंधामि इशानद्वारं बन्धामि, अधोद्वारं बधामि उद्ध्र्वद्वारं बन्धामि, वक्त्र बंधामि, सर्वग्रहं बंधामि, आत्मरक्षा, पररक्षा, भूतरक्षा, पिशाचरक्षा शाकिनी रक्षा चोरं बंधामि यः ठः ठः स्वाहा सर्व्वकर्मकरीनाम विद्याज्वरविनाशिनी भवति। ॐ ह्रां ह्रीं ज्वां ज्वीं लाह्वापलक्ष्मी पद्मावती आगच्छ२ स्वाहा। एनां विद्यामष्टोत्तार-सहस्रश्वेतपुष्पैरष्टोत्तरशतं जप्य पार्श्वनाथचैत्ये जापेन सिद्धिर्भवति। ॐनमश्चण्डिकायै। ॐचामुण्डेउच्छिष्ट चण्डालिनी अमुकस्य हृदयं प्रविशये स्वाहा। ॐउच्छिष्ट चण्डालिनी अमुकस्य हृदयं पित्वा ममहृदयं प्रविशेत्क्षणादानय स्वाहा। ॐचामुण्डे अमुकस्य हृदयं पिबामि ॐचामुण्डिनी स्वाहा।

सित्थय पडिमं काउ सम्पुन्न तिय दुएण तावेह।
पच्छाराईय होमे सव्वरसेणं वसी कुणइ॥१॥

मन्त्रः ॐउत्तमातङ्गिनी आपइ विस्सेपइ कित्तिएपइ पुत्रं सग्ग चण्डालि स्वाहा हुं हाँ हूं हः एकान्तरज्वरमन्त्रः ॥१॥

ताम्बूलेन सह देयः। ॐ ह्रीं ॐनामाकर्षणं। ॐ गः मः ठः ठः गतिबन्धः ह्रीं ह्रां ह्रं ह्रः ॐ देव२ मुखबन्धः। ॐह्रीं फुट् क्रौं प्रो च्वि—त्री ठः ३ कुण्डलीक करणम्। ॐलो३ ललाटघटप्रवेशः। ॐ यः विसर्ज्जनीयं होठकण्ठजिह्वामुखखील ॐतालूखील ॐजिह्वा खिल ॐॐखिल्ल ॐतालूहं गरुडं बहु चञ्चुर हिरे ठंठः महाकालीयोग कालीकुंयो मर्मसिद्धसिद्धओ प सप्प मुहबंधि ॐ ठः ठः सर्प्पमन्त्रः। ॐभूरसीभूतधात्री विविधचूर्णैरलंकृता स्वाहा भूमिशुद्धिः। डाकिनीमन्त्रः ॐनमो भगवते श्रीपार्श्वनाथाय सर्व्व-शाकिनीयोगिनीनां मण्डलमध्ये प्रवेशय२ आवेशय२ सर्वशाकिनी सिद्धिसत्त्वेन सर्षपांस्तारय२ स्वाहा। सर्षप तारणमन्त्रः। ॐनमो सुग्रीवाय ह्रीं खट्वाङ्गत्रिशूलडमरूहस्तेतिसतीक्ष्णकरालेवटेलनेल-कपोले लुञ्चितकेशकलापे वरदे अमृतशिरलाले गण्डे सर्व्व डाकिनीनां वशङ्कराय सर्व्वमन्त्रच्छिन्दिनानिलये आगच्छ२ स्वाहा भगवति त्रिशूलं लोलय२ इअ····डाकिनी चल३ ह्रीं ह्रूं३ घः३ घुः चाटुस्वाहा। शाकिनी निग्रहमन्त्रः। न चलइ किल किलइ फेत्कारिअ सिद्धिहइ निवारइन्द्रेसि भमइ आउसि पइ सइ हालषूलिमाइ२ रक्तसीपुत्तपसमं नरकसी डाकिनी मन्त्रः। ॐहं सं वं क्षं कमलवर्जू षूं लाँ ह्राँ ग्राँ हुं फट्ट ॐ स्वों क्रं क्रों शाकिनीनां निग्रह कुरु२ हुं फट्ट अश्वगन्धैः यवसर्षप कर्पासिकानि अभिमन्त्र्य वस्तुनि आच्छोटयते उखलमुशलवर्त्तिनां वालाः गरुडैः सिदूरैस्ताडयेत् शाकिनीस्फुटीस्यात् त मोचयति शा॰ किल हि मूल तन्दुलोदकेन घर्षयित्वा तिलकं क्रियते शा॰ स्तम्भः स्यात्।

अतः परं प्रवक्ष्यामि योगिनीक्षोभमुत्तमम्।
विह्वासं मन्त्रसंसिद्धं सर्व्वसङ्घैः प्रपूजितम् ॥१॥

ॐसुग्रीवाय नमः। हुते वानराय स्वाहा शाकिनीनां नाशाग्र मुद्रां युयु बंध२। ॐनमो भगवते सुग्रीवाय सर्व्वशाकिनीनां प्रमर्द्दनाय हिलि२ मिलि२ वानराय स्वाहा डाकिनी दिग्बन्धः। पुत्ररक्षावश्यं। ॐनमो सुग्रीवाय लोरमत्तमातंगिनी स्वाहा। मुद्रिकामन्त्रः। चक्र-मुद्राप्रेषित व्याग्रह ग्रहीतस्य मुद्रादर्शनादेवग्रहो निगच्छति। ॐनमः सुग्रीवाय नमश्चामुण्डे तक्षित्रकालोग्रहविशत् हन२ भञ्ज२ मोटय२ रोषिणीदेवीसुस्वाप स्वाहा। प्रोच्छादने विद्या। ॐनमो सुग्रीवाय परम-सिद्धसर्वशाकिनीनां प्रमर्द्दनाय। कुट्टय२ आकर्षय२ वामदेवे२ प्रेतान् दह२ मममंहिलि रहि२ उसग्रस२ हुं फुटु२ यसि शूलचण्डायनो विद्य-माम हन२ प्रचण्ड सुग्रोवा आज्ञापयति स्वाहा। सर्वकर्म्मकरोऽयं मन्त्रः। ॐनमो सुग्रीवाय वार्षिके सोमवचनाय गौरमुखी शूलिनी हुं चामुण्डे स्वाहा। अनया विद्यया सकलंपरिजप्य कणवीरलतां सप्ताभिर्मन्त्रितं कृत्वा उशलमुशले ताडयेत् यथा२ ताडयते त योगिनी ताडिता भवति। प्रताडनविद्या १०८ जापः। ॐकारनाम-गर्भितो बहिश्चतुर्द्दलमध्ये ॐमुनिसुव्रताय संलिख्य बहिर्हर२ वेष्टय बहिः कादिक्षकारपर्यन्तं वेष्टय मायाबीजं त्रिधा वेष्टय। तथा द्वितीयं चं कारं नामगर्भितं बहिश्चतुर्द्दल वकारं दातव्य। बहिरष्ट पत्रेषु रकारं दातव्यं। तथा तृतीयं मायाबीजं नामगर्भितो बहिरष्टा-द्वंवकारं देयं। बहिरगारेषु मायादेया। एतद्यन्त्रं कुंकुमगोरोचनया लिखितं धार्यते। उपसर्गोपशमनं। ह्रीं नामगर्भितो क्षं वेष्टय माया त्रिधा वेष्ट्य बहिरष्टाद्वे क्षं ह्रीं क्षूं ह्रीं संलिख्य विदिशि देवदत्तोति देयं। द्वितीयं नामगर्भितं बहिस्वरैर्वेष्टनीयं। तद्वाह्ये ॐह्रीं चामुण्डे स्वाहा इत्यक्षरैर्वेष्ट्यं। एतद्यन्त्रद्वयं लिखित्वा बाहौ धार्यं प्रथमयंत्रा-

